# संस्कृतवाङ्मयसम्बद्धशोधप्रबन्धाद्यभिलेखनशैली

**हरिलालपौडेल:**

Department of Vyakaran (Sanskrit Grammar)
Central Sanskrit Vidyapeeth,
Dang, Nepal

*Submitted: 28* Nov. 2025
*Reviewed : 18 Dec. 2025*
*Accepted : 31 Dec. 2025*
***DOI:** 10.3126/kdk.v6i1.90079*

***Corresponding Author:***

*Harilal Poudel*

***Email:** hlpsharma2035@gmail.com*

**ORCID:** *https://orcid.org/0009-0003-0302-1931*

*Copyright 2026 © the Author (s) and the Publisher*

**कौमोदकी**

***Kaumodaki***

**Journal of Multidisciplinary Studies**
A Peer-Reviewed, Open Access Journal

**ISSN :**
2822 - 1567 (Print)
2822 - 1583 (Online)
https://www.nepjol.info/index.php/kdk/about

**Published by :**
Research Management Cell
Shree Vinduwasini Sanskrit Vidyapeeth (Campus)
Nepal Sanskrit University, Pokhara, Nepal
https://ejournal.vsc.edu.np

**सारः** अनुसन्धानात्मकलेखोऽयं संस्कृतवाङ्मयानुसन्धानप्रबन्ध-शोधलेखादीनामभिलेखनशैलीविषये केन्द्रितोऽस्ति । बह्वायासविहितानुसन्धानोपलब्धिं शोधप्रबन्ध-शोधपत्र-शोधलेखादिरूपेण प्रस्तोतुं शोधप्रबन्धादिप्रस्तुतिशैलीविषयक-ज्ञानमावश्यकं भवति । अत्र लेखे शोधप्रबन्धादिनिर्माणक्रमेऽवलम्बनीयायाः शैल्या विषये, तत्रापि उद्धरणप्रयोग-सन्दर्भटिप्पणी-सन्दर्भग्रन्थसूचीनां विषये, शोधप्रबन्धगतोपशीर्षकादिषु संख्याङ्कनं कर्तव्यं न वेति विषये च विशेषाध्ययनं कृतम् । संस्कृतवाङ्मयानुसन्धानप्रबन्धादिषूद्धरणप्रयोगः कथं कर्तव्यः ? सन्दर्भटिप्पणी कथं कर्तव्या ? सन्दर्भग्रन्थसूची कथं निर्मातव्या ? उपशीर्षकादिषु संख्याङ्कनं कर्तव्यं न वा ? इत्येतादृशानां समस्यामूलकप्रश्नानां समाधानान्वेषणायात्र प्रयत्नो विहितः । तदर्थञ्च गुणात्मकस्वरूपेऽस्मिन्ननुसन्धाने संस्कृतवाङ्मयान्तर्गतानां विविध-विषयाणां मौलिकग्रन्थेभ्यः, शोधप्रबन्धेभ्यः, शोधविधिपद्धति-सम्बद्धग्रन्थेभ्यः, शोधलेखेभ्यश्च स्थालीपुलाक-न्यायेन तथ्यरूपा आवश्यकसामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृत्वा निष्कर्षः स्थापितोऽस्ति । अतोऽस्मिन् मूलतो वर्णनात्मको विश्लेषणात्मकश्च अध्ययनविधिरवलम्बितोऽस्ति । अत्र च यथासम्भवं शोधविधि-प्रविधि-पद्धतिसम्बद्धाः पूर्वस्थापिताः सिद्धान्ताः, तदसम्भवस्थले च पूर्वाचार्यप्रयोगाधृताः स्वकीयावधारणाः पर्याधारत्वेन गृहीताः । प्राप्ततथ्यानां विश्लेषणेन चात्र स्थापितो निष्कर्ष इत्थमस्ति– उद्धरणप्रयोगसन्दर्भे पंक्तित्रयाकारवदुद्धरणं लघु, तदधिकाकारवदुद्धरणं दीर्घमित्यवधेयम् । श्लोकोद्धरणसन्दर्भे तु पंक्तिद्वयात्मकैकः श्लोकोऽपि दीर्घोद्धरणवत् स्थापनीयः । गर्भटिप्पणीसन्दर्भे लेखकप्रधानानां गद्यात्मकानामाधुनिकस्वरूपाणां ग्रन्थानां स्रोतःसन्दर्भप्रदर्शनाय एपिएशैल्यनुरूपाया गर्भटिप्पण्याः प्रयोक्तुं शक्यत्वेऽप्यपौरुषेयाणां /गौणीभूतलेखकानां, श्लोकसूत्रात्मकानां प्राचीनग्रन्थानां कृते एपिएशैल्यनुपयुक्ता । सन्दर्भग्रन्थसूचीनिर्माणसन्दर्भे वेदोपनिषत्पुराणानामपौरुषेयग्रन्थानां सन्दर्भग्रन्थसूचीप्रविष्टिक्रमे ग्रन्थनाम, लेखकादिनाम

(अस्ति चेदेव), प्रकाशनस्थानम्, प्रकाशकनाम, प्रकाशनवर्षश्चेति चत्वारि पञ्च वा प्रमुखतत्त्वानि, लेखक/सम्पादकप्रधानानां ग्रन्थानां कृते च लेखक/सम्पादकनाम, ग्रन्थशीर्षकम्, प्रकाशनस्थानम्, प्रकाशकनाम, प्रकाशनवर्षश्चेति पञ्च प्रमुखतत्त्वानि क्रमशः समावेश्यानि । सामग्रीणां व्यवस्थितततायै शोधप्रबन्धादिगतोपशीर्षकादिषु सङ्ख्याचतुष्टयं यावत् सङ्ख्याङ्कनं, उक्तसंख्यायुत-प्रशीर्षकान्तर्गतेष्वन्येष्वपि गौणोपशीर्षकेषु सत्सु तत्राक्षराङ्कनं कर्तव्यम् । संस्कृतशोधशैल्याः पूर्णविवरणाय च संस्कृतवाङ्मयसम्बद्धानुसन्धानक्षेत्रे मौलिकशैलीपुस्तिकायाः प्रकाशनमावश्यकमिति ।

***शब्दकुञ्जी*** : उद्धरणप्रयोगः, **गर्भटिप्पणीप्रयोगः**, शोधप्रबन्धाद्यभिलेखनशैली, संख्याङ्कनं, सन्दर्भग्रन्थसूचीनिर्माणशैली ।

**विषयपरिचयः**

अनुसन्धातारः स्वकृतस्यानुसन्धानस्योपलब्धिं लोके शोधप्रबन्धरूपेण शोधलेखरूपेण वा प्रकाशयन्ति । स्वकृतानुसन्धानोपलब्धिं शोधप्रबन्धस्य लेखस्य वा रूपेण प्रस्तोतुञ्च तयोः स्वरूपसङ्घटनविषये, प्रायोगिकपक्षविषये, प्रस्तुतिशैलीविषये च ज्ञानं भवितव्यम् । एतत्सर्वमपि 'शैली' पदेन बोध्यते । शैलीज्ञानाय चाधुना एपिए (अमेरिकन साइकोलोजिकल एसोसिएसन) एमएलए (मोडर्न ल्याङ्ग्वेज एसोसिएसन अफ अमेरिका), सिकागो स्टाइल, तुरेबियन स्टाइल, वेन्कुवर स्टाइल, हावर्ट स्टाइल, बिली चाइनिज साइटेसन स्टाइल इत्यादयो विविधाः शैलीदिग्दर्शिकाः बहुप्रचलिताः सन्ति । पूर्वोक्ताः सर्वा अपि शैलीदिग्दर्शिकाः तत्तद्विषयप्रकृत्यनुसारेण परस्परं वैभिन्यं भजन्ते । संस्कृतवाङ्मयस्य मौलिकं वैशिष्ट्यम् अन्यासां भाषाणां विषयाणाञ्चापेक्षया नितान्तं भिन्नमेवास्तीति पूर्वोक्तासु काचिदपि शैली संस्कृतवाङ्मयसम्बद्धानुसन्धानप्रबन्धेषु संस्कृतशोधलेखेषु वा पर्याप्ता भवितुं न शक्नोति । यथा- एपिएशैल्यनुसारेण गर्भटिप्पण्यां लेखकान्त्यनाम, प्रकाशनवर्षः, पृष्ठसंख्या चेति त्रिकं देयम्, एमएलएशैल्यनुसारेण च लेखकान्त्यनाम, पृष्ठसंख्या चेति द्विकं देयम् । अपौरुषेयाणां वेदोपनिषदामुद्धरणे लेखकान्त्यनाम दातुं न शक्यते । किञ्चातिप्राचीनग्रन्थानां बहुभ्यः स्थानेभ्यो बहुभिर्विद्वद्भिः सम्पादकैर्व्याख्याकारैष्टीकाकारैर्वा ससम्पादनं सव्याख्यानं सटीकञ्च प्रकाशयितुं शक्यत्वात् प्रतिप्रकाशनं ग्रन्थानामाकारपृष्ठादीनां वैभिन्यकारणात् पृष्ठसंख्यया स्रोतःप्राप्तिरसम्भवा । अत एव वेदादीनामपौरुषेयाणां ग्रन्थानां कृते लेखकमितिपृष्ठपद्धतिः (एपिएशैली) लेखकपृष्ठपद्धतिः (एमएलएशैली) चापर्याप्ते स्तः । अन्याः प्रचलिताः शैल्योऽपि नोपयुक्ताः । अत एव संस्कृतवाङ्मयसम्बद्धानुसन्धानक्षेत्रे कस्याश्चित् संस्कृतोपयोगिन्याः शैल्या विकासः समपेक्ष्यते संस्कृतवाङ्मयसम्बद्धानुसन्धातृभिः । लेखोऽयं तन्मार्गोन्मुखो लघुप्रयत्नोऽस्ति ।

इदानीं संस्कृतवाङ्मयसम्बद्धानुसन्धानक्षेत्रे समापतिताः शैलीसम्बद्धा अनेकाः समस्या दृश्यन्ते । तत्र संस्कृतवाङ्मयसम्बद्धशोधप्रबन्धसम्पादनशैली का ? इति सामान्या समस्या । संस्कृतवाङ्मयसम्बद्धशोधप्रबन्धादिषूद्धरणप्रयोगः कथं कर्तव्यः ? सन्दर्भटिप्पणी कथं कर्तव्या ? सन्दर्भग्रन्थसूची कथं निर्मातव्या ? उपशीर्षकादिषु संख्याङ्कनं कर्तव्यं न वा ? इत्यादयश्च विशिष्टीकृतसमस्याः । शैलीसम्बद्धानामेतासां समस्यानां समाधानमत्यावश्यकमस्ति, यतो हीदानीं संस्कृतानुसन्धातृभिरेताः समस्या बहुशोऽनुभूयमानाः सन्ति ।

संस्कृतवाङ्मयसम्बद्धशोधप्रबन्धसम्पादनशैलीनिर्धारणमेवास्य शोधलेखस्य मूलभूतमुद्देश्यमस्ति । तत्रापि विशेषत उद्धरणप्रयोगविधिनिर्धारणम्, सन्दर्भटिप्पण्याः सन्दर्भग्रन्थसूच्याश्च स्वरूपप्रदर्शनम्, उपशीर्षकादिषु संख्याङ्कनस्यावश्यकत्व-प्रदर्शनपूर्वकं तद्रीतिविमर्शनञ्चेत्यस्य विशिष्टोद्देश्यानि ।

**पूर्वकार्याणां समीक्षा**

विषयपरिचये समुत्थापितानां समस्यानां समाधानाय केनापि परिपूर्णप्रयत्नः कृतो न दृष्टिपथमागतः, यद्यप्येतद्विषयसम्बद्धानि कानिचन कार्याणि जातानि दृश्यन्ते । शोध्यविषयेण, सम्बद्धसमस्याभिश्च प्रत्यक्षाप्रत्यक्षरूपेण सम्बद्धानि कानिचन पूर्वकार्याण्यत्र ससंक्षिप्तसमीक्षं चर्च्यन्ते –

भागीरथीप्रसादत्रिपाठिमहोदयस्य अनुसन्धानपद्धतिः (२०२६) इति पुस्तकं स्वतन्त्रग्रन्थरूपेण, सारस्वती-सुषमापत्रिकायां (२३.२, ई. १९६८) च प्रकाशितं दृश्यते, यत्रानुसन्धानस्य प्राविधिकपक्षेषु चर्चा कृता न प्राप्यते ।

हरिप्रसादाचार्य-स्थानेश्वरगौतमाभ्यां लिखिते ‘अनुसन्धानप्रकाशः’ (२०४२) इति पुस्तके तु शोधप्रबन्धसङ्घटनादि-प्राविधिकपक्षेष्वपि चर्चा कृता दृश्यते । तत्कालीनसमये पुस्तकस्य तस्य बहूपयोगित्वेऽपि समयक्रमेण शोधसम्बद्धनवीनपद्धतीनां विकसितत्वात् परिवर्तितेऽस्मिन् समये तन्निर्दिष्टाः पद्धतयः प्रविधयश्चापर्याप्ता जाताः ।

इदानीं जीवन-अधिकारीमहोदयस्य निर्देशने प्रकाश-तिवारीत्यनेन लेखकेन अनुसन्धानपद्धतिः (२०८१) इति पुस्तकं प्रकाशितं दृश्यते । पुस्तकेनानेन क्षेत्रेऽस्मिन् योगदानं दीयमानमस्ति । शास्त्रिकक्षायाः पाठ्यक्रममनुसृत्य विरचितत्वात्तस्याः कक्षायाः छात्राणां कृते बहूपयोगित्वेऽपि संस्कृतवाङ्मयसम्बद्धाभिलेखनशैलीविषयकपरिपूर्णविचारो न कृतस्तत्र ।

नेपालसंस्कृतविश्वविद्यालयानुसन्धानकेन्द्रात् प्रकाशिते ‘अनुसन्धान प्रकाश’ इति नामके पुस्तकेऽनुसन्धानसम्बद्धानि विदुषां कानिचन कार्यपत्राणि प्रकाशितानि दृश्यन्ते, येषु नारायण चालिसे इत्यस्य ‘शोध प्रबन्धको सङ्गठन’ (दहालः, अन्ये च, २०७३, पृ. ८६-९१), ताराकान्त पाण्डेयस्य ‘विद्यावारिधि शोधप्रबन्धको सङ्गठन र ढाँचाको प्रायोगिकी’ (दहालः, अन्ये च, २०७३, पृ. ९९-११५ ), दयाराम श्रेष्ठस्य ‘शोधपत्रको अभिलेखन पद्धति’ (दहालः, अन्ये च, २०७३, पृ. ११६-१२०) इति शीर्षकाणि कार्यपत्राण्याधुनिकविषयसम्बद्धशोधप्रबन्धस्वरूपशैलीवियकं मार्गदर्शनन्तु कुर्वन्ति, किन्तु तानि संस्कृतवाङ्मयसम्बद्धशोध-प्रबन्धाद्यभिलेखनशैलीविषयकमार्गप्रदर्शनाय पर्याप्तानि नैव सन्ति । तस्मिन्नेव पुस्तके माधवप्रसाद-पोखरेलस्य ‘संस्कृत वाङ्मयको शोधविधि’ इति शीर्षकं कार्यपत्रं प्रकाशितमस्ति, यत्र तेन संस्कृतवाङ्मयस्य ग्रन्थेष्वेव तत्सम्बद्धशोधविधिः प्राप्यते, अत एव संस्कृतवाङ्मयसम्बद्धशोधविधेरन्वेषणाय अन्तरराष्ट्रिया सङ्गोष्ठी कर्तव्या, संस्कृतवाङ्मयस्य शोधविधिविषये विश्वविद्यालयेन विद्यावारिध्यनुसन्धानञ्च कारयितव्यमिति परामर्शः प्रदत्तोऽस्ति (पोखरेल, २०७३, पृ. १२८) ।

नेपालीभाषासम्बद्धानुसन्धानेषु एपिएशैल्याः प्रयोग आधिक्येन क्रियत इति एपिएशैल्या अद्यावधिकस्य सप्तमसंस्करणस्य प्रावधानान् प्रस्तुवन् खगेन्द्र-घोडासैनी हैमप्रभायाः २१ तमेऽङ्के ‘एपिए सातौँ संस्करणका प्रावधानहरू’

इति शीर्षकं शोधलेखं प्रकाशितवान् (२०७९, पृ. ४२–५९) । संस्कृतवाङ्मयसम्बद्धानुसन्धानक्षेत्रेऽपि एपिएशैल्याः प्रयोग आंशिकरूपेण कर्तुं शक्यत इति संस्कृतवाङ्मयसम्बद्धानुसन्धातॄणां कृतेऽपि स लेखः क्वचित् उपयोगी भवति, किन्तु न सर्वत्र।

दुर्गाबहादुर घर्ती इत्यनेन विदुषा अनुसन्धानपद्धतिमद्यावधिकीकर्तुं विरचितम् 'अनुसन्धान पद्धति : सिद्धान्त र प्रयोग' (२०८०) इति पुस्तकमप्युल्लेख्यमस्ति (चौलागाईँ, २०८०, अनुच्छेदः ३) । अस्मिन् पुस्तके एमएलए-एपिए-सिकागोपद्धतीनां चर्चा कृता, किन्तु उद्धरणप्रयोगे सन्दर्भसामग्रीसूचीविन्यासे चात्र एपिएशैल्याः सप्तमसंस्करणमाधारीकृतम् (चौलागाईँ, २०८०, अनुच्छेदः ३०) । पूर्वीयवाङ्मये खल्वनादिकालाच्छ्रुतिपरम्परया हस्तान्तरिताः, बहुकालानन्तरमेव लिपिबद्धीकृताः लेखकविशेषनामरहिताः वेद-ब्राह्मणारण्यकोपनिषदादयो विशिष्टग्रन्थाः सन्ति । एतादृशानामुद्धरणप्रक्रिया घर्तीमहोदयेन नोल्लिखिता, सन्दर्भसामग्रीसूच्यामपि तादृशा ग्रन्था न समाविष्टाः (चौलागाईँ, २०८०, अनुच्छेदः ३२)।

नेपालसंस्कृतविश्वविद्यालयानुसन्धानकेन्द्रेण २०८२/०३/१४-१६ दिनाङ्केषु 'पौरस्त्यशोधपद्धतेर्निरूपणम्' इति शीर्षके त्रिदिवसीयाऽन्ताराष्ट्रिया सङ्गोष्ठी समायोजिता, यस्यां सङ्गोष्ठ्यां नेपालस्य भारतस्य च विभिन्नेभ्यो विश्वविद्यालयेभ्योऽनेके विद्वांसः समुपस्थिताः, शोधपद्धतिसम्बद्धेषु विविधशीर्षकेषु स्वकीयकार्यपत्राणि च प्रस्तुतवन्तः । संस्कृतवाङ्मयानुसन्धाने विधि-प्रविधि-पद्धति-शैलीसम्बद्धा याः समस्याः शोधकर्तृभिरनुभूयमानाः सन्ति, ताः समस्याः तया गोष्ठ्याऽपि, तैः कार्यपत्रैरपि न समाहिताः।

नेपालसंस्कृतविश्वविद्यालयानुसन्धानकेन्द्राद् संस्कृतवाङ्मयसम्बद्धानि विविधानि शोधकार्याणि सम्पन्नानि सन्ति, येषु कुत्रचिदुद्धरणप्रयोगे गर्भटिप्पण्यादिषु च संस्कृतवाङ्मयस्य मौलिकाः प्रविधयोऽपि प्रयुक्ता दृश्यन्ते।

नेपालसंस्कृतविश्वविद्यालयस्याङ्गिकविद्यापीठेभ्योऽनुसन्धानात्मिकाः पत्रिकाः प्रकाश्यन्ते । विश्वविद्यालय-विद्यापीठाद् 'अन्वेषणा', जनताविद्यापीठाद् 'हैमप्रभा', विन्दुवासिनीविद्यापीठात् 'कौमोदकी', कालिकाविद्यापीठात् 'कालिकाप्रभा', पिण्डेश्वरविद्यापीठाच्च 'शोधसुधा', 'प्रज्ञाज्योति'श्चेति इति द्वे पत्रिके इति कृत्वा षट् पत्रिकाः NepJOL वेभसाइटमध्येऽपि प्रकाश्यमानाः सन्ति । तासु पत्रिकासु संस्कृतवाङ्मयसम्बद्धानुसन्धानमूलका लेखा अपि प्रकाशिता दृश्यन्ते, येषु संस्कृतवाङ्मयस्य मौलिकाः प्रविधयोऽपि कुत्रचित् प्रयुक्ता दृश्यन्ते, किन्तु तत्रैकरूपता न दृश्यते ।

संस्कृतशोधप्रविधेरेकरूपतायै विशेषः प्रयत्न आवश्यकः । तस्य कृते च संस्कृतवाङ्मयसम्बद्धसमग्रशोधपद्धतिं, विधिं, प्रविधिञ्चादायाधिकारिकनिकायाच्छैलीपुस्तकरूपेणाधिकारिकग्रन्थः प्रकाशनीय इत्यनुभूयते, किन्त्वद्यावध्येतद्विषये संस्कृतवाङ्मयसम्बद्धया कयापि संस्थया केनापि विदुषा वा तादृशः प्रयत्नः कृतो न दृश्यते ।तादृशस्य प्रयत्नस्यैकः सूक्ष्मोंऽशोऽत्र शोधलेखे प्रस्तूयते।

**अध्ययनविधिः**

अस्मिन्ननुसन्धानेऽव-लम्बितोऽध्ययनविधिर्यथा-

***अनुसन्धानस्वरूपम्***

अनुसन्धानमिदं तथ्याङ्कविश्लेषणाधारितमस्ति, अत एवेदं गुणात्मकस्वरूपकमनुसन्धानमस्ति । अत्र हि संस्कृतवाङ्मयानुसन्धानप्रबन्धाद्यभिलेखनशैलीसम्बन्धे पूर्ववर्त्यनुसन्धातृकृतीनामध्ययनं, तेभ्यः प्राप्तानां तथ्यानां समीक्षात्मकं विश्लेषणञ्च कृत्वा शब्दात्मको निष्कर्षः स्थापितोऽस्ति।

***अनुसन्धानस्य क्षेत्रं सीमा च***

अस्मिन् शोधलेखे संस्कृतवाङ्मयानुसन्धानप्रबन्धाद्यभिलेखनशैलीसम्बन्धेऽध्ययनं विश्लेषणञ्च क्रियते । अत एवास्यानुसन्धानस्य क्षेत्रं संस्कृतवाङ्मयानुसन्धानप्रबन्धाद्यभिलेखनशैली । समग्राया अभिलेखनशैल्या अध्ययनमेकस्मिन् लघुलेखे न सम्भवतीति मूलत उद्धरणप्रयोगं सन्दर्भटिप्पणीं सन्दर्भग्रन्थसूचीं संख्याङ्कनञ्च केन्द्रीकृत्येदमध्ययनं प्रवृत्तमस्ति। एषैवास्य शोधकार्यस्य सीमा।

***तथ्यसङ्कलनं तत्साधनानि च***

अत्र संस्कृतवाङ्मयानुसन्धानविधिप्रविधिपद्धतिशैलीसम्बन्धे लिखितान् ग्रन्थान्, शोधलेखान्, प्रयोगपक्षाँश्चाधृत्य तथ्यसङ्कलनं विहितम्। तत्क्रमे च प्राथमिकस्रोतोभ्यो द्वितीयकस्रोतोभ्यश्च तथ्यानि सङ्कलितानि। तस्य कृते विभिन्नानां प्रकाशितपुस्तकानां, पत्रिकाणां, लेखानां वैद्युतमाध्यमानाञ्चोपयोगः कृतोऽस्ति । अत एवात्र प्रकाशितसामग्रीणां वैद्युतमाध्यमप्राप्ततथ्यानाञ्च समीक्षात्मकं विश्लेषणं कृत्वा निष्कर्षप्रतिपादनाय प्रयत्नः कृतोऽस्ति।

***तथ्याङ्कविश्लेषणप्रक्रिया***

पूर्वोक्तरीत्या प्राप्तानां तथ्यानां वर्णनं तुलनाञ्च कृत्वा तथ्यानां सत्यापनाय पुष्ट्यै च सोदाहरणं विश्लेषणं कृत्वा निष्कर्षप्राप्त्यै प्रयत्नः कृतोऽस्ति । अध्ययनावलोकनतोलनोदाहरणदानप्रयोगप्रदर्शनस्थापितर्निष्कर्षेऽस्मिन् शोधलेखे यथावश्यकं निगमनाऽऽगमन-विधिभ्यां विश्लेषणं कृत्वा निष्कर्षो निष्पादितोऽस्ति।

**सैद्धान्तिकोऽवधारणात्मकश्च पर्याधारः**

अस्मिन् शोधलेखे संस्कृतवाङ्मयानुसन्धानविधिप्रविधिपद्धतिशैलीसम्बन्धे पूर्ववर्तिभिः स्थापिताः सिद्धान्ताः यथासम्भवं समाधृताः, समुचितमतानि च ससम्मानं गृहीतानि। यत्र सिद्धान्त एव न स्थापितः, मतान्यपि न प्राप्यन्ते, तत्र पूर्वाचार्यप्रयोगानेवाधारीकृत्य स्वकीयावधारणा पुरस्कृता, सैव च पर्याधारत्वेनाऽऽधृता । निश्चितसिद्धान्ताभावेन प्रयोगेषु वैविध्यन्तु भवत्येव, तत्र च कः प्रयोगः समुचित इति विषये सूक्ष्मावलोकनं तुलनात्मकं विश्लेषणञ्च विधाय स्वविवेकेन तर्कपूर्वकं निर्णयो विहितः। इत्थञ्चात्र लेखे **यथासम्भवं** शोधविधिपद्धतिसम्बद्धाः पूर्वस्थापिताः सिद्धान्ताः, तदसम्भवस्थले च पूर्वाचार्यप्रयोगाधृताः स्वकीयावधारणाः पर्याधारत्वेन गृहीताः । अत्र लेखे प्रस्ताविताऽभिलेखनशैलीदानीं प्रस्तावितैवास्तीति लेखस्वरूपनिर्माणक्रमे तु प्रकाशकानुरोधाद् एपिएशैल्येवानुसृतास्ति।

**शोधप्रबन्धाद्यभिलेखनशैली**

अनुसन्धाने सम्पन्ने सति अनुसन्धानोपलब्धीनामभिलेखनं कृत्वा शोधप्रबन्धादिकं सम्पाद्यते । तत्सम्पादनस्य च काश्चन शैल्यो भवन्ति, याः शोधप्रबन्धाद्यभिलेखनशैलीनाम्ना ज्ञायन्ते । शोधप्रबन्धाद्यभिलेखनशैल्यन्तर्गतञ्च- अक्षराकृतिनिर्धारणम्, पत्रावकाश/स्थानान्तराल-संयोजनम्, उद्धरणप्रयोगः, सन्दर्भ-टिप्पणी/स्रोतःसङ्केतः (पादटिप्पणी/गर्भटिप्पणी), अनुच्छेदसज्जा, प्रगाढीकरणं, तिर्यक्करणं, संख्याङ्कनं, पृष्ठाङ्कनमित्यादयः पक्षा आगच्छन्ति । तत्र अक्षराकृतिनिर्धारण-पत्रावकाश/स्थानान्तराल-संयोजनादिषु केषुचिद्विषयेषु सोदाहरणं चर्चा विहिता दृश्यते (तिवारी, २०८१, पृ. ९६-१०२), तत्र विशेषसमस्यापि न दृश्यते । तद्विषयिणी जिज्ञासा तत एव समाधातुं शक्यते । अत्र तु समस्यायुतेषु उद्धरणप्रयोगविषये, सन्दर्भ-टिप्पणी/स्रोतःसङ्केतविषये, सन्दर्भग्रन्थसूचीविषये, उपशीर्षकादीनां संख्याङ्कनविषये च चर्चा क्रियते ।

***उद्धरणप्रयोगः***

शोधप्रबन्धशोधलेखादिलेखनक्रमे हि पूर्णतयौपचारिकी वस्तुनिष्ठा च भाषा प्रयुज्यते । स्वकीयानुसन्धानस्य प्रामाणिकतायै च यथेष्टप्रमाणानि, तथ्यानि, पूर्वानुसन्धानोपलब्धिनिष्कर्षादयश्च प्रस्तूयन्ते । तदर्थञ्चोद्धरणानि प्रयुज्यन्ते । तानि च प्रत्यक्षाप्रत्यक्ष-शब्दान्तरितभेदेन त्रिधा भवन्ति ।

**प्रत्यक्षोद्धरणम् :** यस्य कस्यापि मतम्/कथनं यथावद्रूपेण तस्यैव ग्रन्थाद् गृह्यते चेत् तत् प्रत्यक्षोद्धरणम् (श्रेष्ठ, २०७३, पृ. ११७) । यथा नागेशमतं शेखरमञ्जूषादिभ्यस्तदीयकृतिभ्यः, विश्वनाथमतं साहित्यदर्पणात्, वैदिकप्रमाणं वेदग्रन्थेभ्यो गृह्यते चेत्तत् प्रत्यक्षोद्धरणम् । एतच्च लघुदीर्घभेदेन द्विधा विभज्यते ।

***लघूद्धरणम् :*** आङ्ग्लनेपाल्यादिष्वाधुनिकभाषासु एपीएपद्धत्यनुसारेण ४० शब्दतो न्यूनाकारवदुद्धरणं (श्रेष्ठ, २०७३, पृ. ११७), एमएलएपद्धत्यनुसारेण च पंक्तित्रयं यावदाकारवदुद्धरणं (पाण्डेय,२०७३, पृ. ११०) लघु मन्यते । संस्कृतवाङ्मय-सम्बद्धानुसन्धानसन्दर्भे लघुदीर्घोद्धरणयोर्मानदण्डरूपेण शब्दसीमानं स्वीकर्तुं न शक्यते, यतो हि संस्कृते समासस्याधिकः प्रयोगो भवति, अतः शब्दगणनायां जाटिल्यं भवति । एकस्मिन्नेव समस्तपदे चत्वारिंशच्छब्दानां प्रयोगो भवितुमपि शक्नोति । अत एव संस्कृते शब्दगणनाधारेणोद्धरणानां लघुदीर्घाकारविभाजनं व्यावहारिकं न भवति । अतः शब्दगणनां विहाय पंक्तिगणनाधारेण लघुदीर्घोद्धरणयोर्मानदण्डो निर्धारयितव्यः । अत एवात्र पंक्तित्रयाकारवदुद्धरणं लघु, तदधिकाकारवदुद्धरणं दीर्घमिति मन्तव्यम् । लघूद्धरणञ्च युगलोद्धरणचिह्नमध्ये (“.....”) स्थापयित्वा यथाप्रसङ्गमनुच्छेदमध्य एवोपन्यस्यते । उद्धरणानन्तरञ्च कोष्ठके स्रोतःसङ्केतः कर्तव्यः, यस्य सङ्केतस्य नाम गर्भटिप्पणीति । गर्भटिप्पण्यनन्तरमेव च पूर्णविरामचिह्नं प्रयुज्यते ।

***दीर्घोद्धरणम् :*** आङ्ग्लनेपाल्यादिष्वाधुनिकभाषासु एपीएपद्धत्यनुसारेण ४० शब्दवत् तदधिकाकारवच्चोद्धरणं (श्रेष्ठ, २०७३, पृ. ११७), एमएलएपद्धत्यनुसारेण च पंक्तिचतुष्टयाकारवत्, तदधिकाकारवच्चोद्धरणं (पाण्डेय,२०७३, पृ.

११०) दीर्घं मन्यते । **संस्कृतवाङ्मयसम्बद्धानुसन्धानसन्दर्भे** एमएलएपद्धत्यामिव पंक्तिचतुष्टयाकारवत्, तदधिकाकारवच्चोद्धरणं दीर्घमित्युक्तम् । दीर्घोद्धरणञ्च भिन्नानुच्छेदरूपेणैवोल्लेख्यम् (श्रेष्ठ, २०७९, पृ. ११८) ।

***श्लोकोद्धरणे लघुत्वदीर्घत्वयोर्मानदण्डः :*** संस्कृतवाङ्मयसम्बद्धानुसन्धाने लघुदीर्घोद्धरणयोः पूर्वोक्तव्यवस्था गद्योद्धरणसन्दर्भ एव । श्लोकोद्धरणसन्दर्भे तु पंक्तिद्वयात्मकैकः श्लोकोऽपि दीर्घोद्धरणवद् भिन्नानुच्छेद एव केन्द्रीकृत्य प्रगाढीकृत्य चोपन्यस्यते । यथा- सोमनाथसिग्देलेन 'अनुवादचन्द्रिका'-तृतीयप्रकाशे द्वयोः पदयोर्बहूनां पदानां वा समासो बहुव्रीहिः, स चान्यपदार्थप्रधान इत्युक्त्वा तस्य दशधात्वमुक्तम् :

**पदयोर्वा पदानां वा योगो बाह्यार्थबोधकः ।**
**बहुव्रीहिः क्वचिदलुक् सोऽयं दशविधो मतः** । ( पौडेलः, २०६४, पृ.१७०) इति ।

एकपंक्त्यात्मकस्य श्लोकांशस्योद्धरणसन्दर्भे तु लघूद्धरणवद् युगलोद्धरणचिह्नमध्ये ("…..") स्थापयित्वा यथाप्रसङ्गमनुच्छेदमध्य एवोपन्यसनमुचितम् ।

**अप्रत्यक्षोद्धरणम् :** एकस्य लेखकस्य/विदुषः कथनमन्यस्य लेखकस्य ग्रन्थादुद्ध्रियते चेत्तदप्रत्यक्षोद्धरणम् । एतादृशोद्धरणे मतमिदं कस्यास्तीति अनुसन्धाता स्वकीयशब्देषु लिखति, किन्तु गर्भटिप्पण्यां यस्माद् ग्रन्थात्तदुद्धरणं गृहीतं, तस्यैव सङ्केतं करोति । अन्य उद्धरणविधिः, टिप्पणीविधिश्च प्रत्यक्षोद्धरण इव भवति । यथा- न्यायसिद्धान्तमुक्तावल्यादौ व्याकरणोपमानकोशादीनां शक्तिग्रहाधायकत्वमित्थमुप-वर्णितम् –

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः** (त्रिपाठी, २०४७, पृ. २३) इति ।

**शब्दान्तरितोद्धरणम् :** कस्याश्चित् सान्दर्भिकसामग्र्या मूलभूतविचारं, मान्यतां धारणां वा सम्यग् बुद्ध्वा शोधकर्ता स्वकीयभाषाशैल्यां तद्विचारसारं प्रस्तौति चेत्तदेव शब्दान्तरितोद्धरणं कथ्यते । एतादृशोद्धरणेष्वपि प्रत्यक्षाप्रत्यक्षोद्धरणेष्विव कोष्ठकीयटिप्पणी दीयते । यथा–

श्रीमद्भागवतेऽपि जगत्सृष्टिप्रक्रियावर्णनप्रसङ्गे भगवतो नारायणस्य नाभिपद्मे ब्रह्मा जातः, स च 'कुतोऽहं जातः किञ्च मे कर्तव्यमि'ति जिज्ञासया चतसृषु दिक्ष्वपश्यत्, तदा सः पद्मनाभं नारायणमपश्यत्, तं दृष्ट्वा प्रसन्नो ब्रह्मा बह्वीभिः स्तुतिभिः तं स्तुतवान् । स्तुत्या प्रसन्नो भगवान् ब्रह्माणं तपस्तप्त्वा यथापूर्वं प्रजाः स्रष्टुमुपदेशं दत्तवान् (श्रीमद्भागवतम्, ३।९।२९-४३) इति वणितं दृश्यते (पौडेलः, २०८०, पृ. १२२) ।

***स्रोतःसङ्केतः/सन्दर्भ-टिप्पणी (पादटिप्पणी/ गर्भटिप्पणी )***

स्वकीयानुसन्धानप्रतिवेदनस्य प्रामाणिकतायै पूर्ववर्तिनामनुसन्धातॄणां विदुषामाचार्याणाञ्च मतान्युद्ध्रियन्ते । तानि च मतानि कुत उद्धृतानीति सप्रमाणं ज्ञापनाय तेषां स्रोतःसङ्केतः कर्तव्यः । स्रोतःसङ्केताय च पादटिप्पणीरूपेण

गर्भटिप्पणीरूपेण वा सन्दर्भ-टिप्पणी क्रियते । वर्तमानकाले पादटिप्पण्यपेक्षया गर्भटिप्पणीनामधिकः प्रयोगो दृश्यते, यतो हि संक्षिप्तरूपत्वात्, प्रयोगसारल्याच्च लेखकपाठकानां प्रियतां गतास्ति सा । यत्र विशेषस्पष्टताऽऽवश्यकायते, तत्र तु गर्भटप्पणीप्रयोगकर्तृभिरपि पादटिप्पणी प्रयोक्तव्या भवति ।

**पादटिप्पणी :** मूलपाठे उद्धरणानन्तरं संख्यया सङ्केतं कृत्वा पृष्ठाधस्तात् परिपूर्णा सन्दर्भटिप्पणी क्रियते चेत् सा पादटिप्पणीति कथ्यते । तत्प्रयोगस्य च स्रोतःप्रकृत्यनुसारेण भिन्नभिन्नाः पद्धतयो भवन्ति । कानिचनोदाहरणान्यत्र प्रस्तूयन्ते –

***ग्रन्थप्रधानपद्धतिः :*** अपौरुषेयग्रन्थेषु, पौरुषेयत्वेऽपि स्वनाम्नैव प्रसिद्धेषु ग्रन्थेषु च पादटिप्पणीविषयीभूतेषु ग्रन्थप्रधानपद्धत्या पादटिप्पणी कर्तव्या ।

***अपौरुषेयग्रन्थेषु :*** अपौरुषेयग्रन्थेषु पादटिप्पणीविषयीभूतेषु ग्रन्थनाम, मण्डल-सूक्ताध्याय-वल्ली-मन्त्रादीनां संख्याञ्च दत्त्वा पादटिप्पणी निर्मीयते । यथा- ऋग्वेदसंहिता ४।५।१।१२, कठोपनिषद् (ईशादि नौ उपनिषद्)२।४।७ इत्यादि ।

***पौरुषेयत्वेऽपि स्वनाम्नैव प्रसिद्धेषु ग्रन्थेषु :*** पौरुषेयत्वेऽपि स्वनाम्नैव प्रसिद्धेषु ग्रन्थेषु पादटिप्पणीविषयीभूतेषु ग्रन्थनाम, सर्गाध्यायपादसूत्रश्लोकादिसंख्याञ्च दत्त्वा पादटिप्पणी निर्मीयते । यथा- वाल्मीकीयरामायणम्, अयो. २।४, रघुवंशमहाकाव्यम् २।७, श्रीमद्भागवतम् १०।५।२१ इत्यादि ।

***लेखकप्रधानपद्धतिः :*** *यानि पुस्तकानि लेखक-व्याख्याकारदिनाम्ना प्रसिद्धानि सन्ति,* तेषु च लेखकप्रधानपद्धत्या पादटिप्पणी कर्तव्या । यथा-

***लेखकनामप्रसिद्धपुस्तकेषु :*** लेखकनाम्ना प्रसिद्धेषु पुस्तकेषु पादटिप्पणीविषयीभूतेषु पादटिप्पणीत्थं निर्मातव्या-

भट्टोजिदीक्षितः, वैयाकरणसिद्धान्तकौमुदी, बालमनोरमाटीकासहिता, भाग-१, च.सं., गोपालदत्तपाण्डेयः (सम्पा.), चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, ई. १९९९, पृ. २५ ।

***व्याख्याकारनामप्रसिद्धपुस्तकेषु :*** व्याख्याकार-नाम्ना प्रसिद्धेषु पुस्तकेषु पादटिप्पणीविषयीभूतेषु पादटिप्पणीत्थं निर्मातव्या-

सभापतिशर्मोपाध्यायः (व्या.), लक्ष्मीटीका (वैयाकरणसिद्धान्तकौमुद्याः) द्वितीयांशः, तृ.सं, बालकृष्णशर्मा (सम्पा.), मोतीलाल बनारसीदास, वाराणसी, वै. १९६६, पृ ५१ ।

***शोधपत्रिकासु :*** शोधपत्रिकासु पादटिप्पणीविषयीभूतासु पादटिप्पणीत्थं निर्मातव्या-

हरिलालपौडेलः, संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणम्, कालिकाप्रभा- ३, २०८२, पृ. १४८ ।

इदानीं पादटिप्पणीप्रयोगो न्यूनायितोऽस्ति । अत एवात्र विशेषतो गर्भटिप्पणी चर्च्यते ।

**गर्भटिप्पणी :** उद्धरणानन्तरमुद्धृतसामग्र्याः स्रोतःसन्दर्भसङ्केताय कोष्ठके लेखकः, सामग्रीप्रकाशनवर्षः, पृष्ठसंख्या चेति त्रिकं संक्षिप्तरूपेण मूलपाठे सङ्केत्यते चेत् सैव गर्भटिप्पणी कथ्यते ।अनुच्छेदगर्भे प्रदीयमानात्वादियं गर्भटिप्पणीत्युच्यते । संस्कृतवाङ्मयानुसन्धाने गर्भटिप्पणीप्रयोगे कथंविधा शैली प्रयोक्तव्येत्यत्र विचारणात् पूर्वमधुना विश्वप्रसिद्धासु बहुतरप्रयुक्तासु च एपिए-एमएलए-सिकागोशैलीष्वेतद्विषये कीदृशी व्यवस्थास्तीति ज्ञातव्यम्।

एमएलएपद्धत्यनुसारेण गर्भटिप्पण्यां (in parenthetical citation) सामान्यरूपेण ग्रन्थचर्चायां कृतायां गर्भटिप्पण्यां केवलं लेखकान्त्यनामैव, ग्रन्थगतविशिष्टांशस्योद्धरणे कृते तु लेखकान्त्यनाम, पृष्ठसंख्या चेति द्विकं प्रदीयते, तन्मध्ये विरामचिह्नमपि न प्रयुज्यते । यदि शोधकर्ता स्ववाक्ये लेखकनाम गृह्णाति चेत् गर्भटिप्पण्यां पुनः लेखकान्त्यनाम लेखनं नावश्यकम, तत्र पृष्ठसंख्यैव लिखितव्या (एमएलए, २०२१, २८६-२९०/४५८)। एतदनुसारञ्च गर्भटिप्पणीस्वरूपमित्थं भवति –

प्रबन्धासारे हि- अनुसन्धेयविषयस्य, समस्यायाः, प्रविधेः, गृहीतसिद्धान्तानां च परिचयप्रदानपुरःसरमनुसन्धान-निष्कर्षः स्थापनीयो भवति (आचार्यः गौतमश्च ५५ )।

अथवा –

आचार्यगौतमयोर्मते प्रबन्धासारेऽनुसन्धेयविषयस्य, समस्यायाः, प्रविधेः, गृहीतसिद्धान्तानां च परिचयप्रदानपुरःसरमनुसन्धान-निष्कर्षः स्थानीयो भवति (५५)।

सिकागोशैलीपुस्तके च गर्भटिप्पण्यां लेखकान्त्यनाम, प्रकाशनवर्षः, पृष्ठसंख्या चेति तथ्यत्रयं कोष्ठके स्थापनीयमित्युदाहृतं दृश्यते (सिकागो, २०२४, पृ ८४९)।

एपिएशैल्यनुसारेण सामान्यरूपेण ग्रन्थचर्चायां कृतायां गर्भटिप्पण्यां लेखकान्त्यनाम, प्रकाशनवर्षश्चेति तथ्यद्वयं प्रदातव्यम् (एपिए,२०२०, पृ. २७६), ग्रन्थगतविशिष्टांशस्योद्धरणे कृते तु गर्भटिप्पण्यां लेखकान्त्यनाम, प्रकाशनवर्षः, पृष्ठसंख्या चेति तथ्यत्रयं कोष्ठके स्थापनीयमिति एपिएशैलीपुस्तके सोदाहरणमुल्लिखितं दृश्यते (एपिए, २०२०, पृ. २७८)। धार्मिकसांस्कृतिकादिक्षेत्र-सम्बद्धेभ्योऽज्ञातलेखकविरचितग्रन्थेभ्यः सामग्र्यः प्रयुज्यन्ते चेत् तदानीं ग्रन्थशीर्षकमेव लेखकस्थानं लभते । अत एव तादृशानां ग्रन्थानां सन्दर्भसङ्केताय गर्भटिप्पण्यां ग्रन्थनाम, प्रकाशनवर्षः, पृष्ठसंख्या चेति तथ्यत्रयमुल्लिखितव्यम् (एपिए, २०२०, पृ. २७८ ) । कतिपय-लेखकाः स्वकृतौ स्वनामोल्लेखं न कुर्वन्ति । तादृशावस्थायान्तु गर्भटिपण्यां सन्दर्भग्रन्थसूच्यां च लेखकनामस्थाने 'अज्ञातः' इत्येव लिखितव्यम् (एपिए,२०२० पृ. २७८) ।

संस्कृतवाङ्मयानुसन्धानसन्दर्भे वेदोपनिषदादीनां कृते लेखकनामस्थाने ग्रन्थनामलेखनपरिपाट्यस्ति, या चोक्तया व्यवस्थया समर्थिता भवति, यद्यपि प्रकाशनवर्षः पृष्ठसङ्ख्या चेति द्वयमपि वेदोपनिषदादीनां कृते नोपयुज्यते । किञ्च रामायण-महाभारत-पुराणरचयितॄणां वाल्मीकि-व्यासादीनां सर्वविदितलेखकानामपि नामोल्लेखो व्यावहारिको न भवति, यतो

हि एपिएशैल्यनुसारेण लेखकनाम्ना सह पृष्ठसंख्या लिखितव्या भवति, तत्र रामायणादिषु च पृष्ठसंख्यातः सामग्री न प्राप्यते। पर्व-काण्ड-अध्याय-सर्ग-श्लोकसंख्यादीनामुल्लेखं विना तत्र कार्यं न चलति। अत एव पौरुषेयाणामप्येतादृशानां ग्रन्थानां सन्दर्भोल्लेखो ग्रन्थनामत एव प्रारब्धव्यो भवति। गर्भटिप्पण्याः कानिचनोदाहरणान्यत्र प्रस्तूयन्ते –

**लेखकप्रधानानां गद्यात्मकानामाधुनिकस्वरूपाणां ग्रन्थानां कृते गर्भटिप्पणीप्रयोगः :** लेखकप्रधानानां गद्यात्मकाना-माधुनिक-स्वरूपाणां ग्रन्थानां स्रोतःसन्दर्भप्रदर्शनाय एपिएशैल्यनुरूपा गर्भटिप्पणी प्रयोक्तुं शक्यते। तादृशग्रन्थानां कृते गर्भटिप्पणीत्थं कर्तव्या-

क) परमेश्वरस्य सिसृक्षात्मिकायां मायावृत्तौ जातायां शक्तितत्त्वाभिधं बिन्दुरूपमव्यक्तं त्रिगुणं जायते। तस्माद् बिन्दोः शब्दब्रह्माऽपरनामधेयं सृष्ट्युपयोग्यवस्थाविशेषं चेतनमिश्रं नादमात्रमुत्पद्यते (नागेशः, २०४७, पृ. २६७-२७१)।

ख) रामानुजाचार्येण श्रीभाष्ये 'अथातो ब्रह्मजिज्ञासा' (ब्र. सू. १।१।१) इति ब्रह्मसूत्रस्य व्याख्यानक्रमे ब्रह्मशब्देन पुरुषोत्तमो नारायणो बोधितः (रामानुजाचार्यः, १९९४, पृ. ३)।

ग) एकाधिकसमर्थपदानां पदयोर्वा सार्थकरूपेण मेलनङ्कृत्वा विशिष्टैकपदीकरणं समासः (पौडेलः, २०७४, पृ. १९०)।

घ) अर्जुनरावणीयं ग्रन्थोऽयं प्राचीनव्याकरणपद्धत्या व्याकरणशिक्षणे अतीवोपयोगी सिद्ध्यति (कुमारः, २०१८, पृ. १२ )।

ङ) भवभूतेः समयः सप्तशतकासन्नः प्रतिपाद्यते विविधैः साक्ष्यैः (मिश्रः, २०१७, पृ. ११०)।

अत्र कोष्ठके लेखकस्यान्तिमनाम (थरपदवाच्यम्), ततोऽल्पविरामः, ततः प्रकाशनवर्षः, ततोऽल्पविरामः, ततः पृ. इति लिखित्वा पृष्ठसंख्या लिखिता। इत्थञ्च- (भारती, १९५१, पृ. १), (पतञ्जलिः, १९९५, पृ. ६५), (सरस्वती, २०१४, पृ. १७-१८), (रामानुजाचार्यः, १९९४, पृ. ३ ) इत्यादिरूपेण गर्भटिप्पणी कर्तव्या।

**अपौरुषेयाणां/गौणीभूतलेखकानां, श्लोकसूत्रात्मकानां प्राचीनानाञ्च ग्रन्थानां कृते गर्भटिप्पणीप्रयोगः :**

वेदा अपौरुषेयाः, पुराणादयः कतिपये ग्रन्था गौणीभूतलेखकाः, येषां लेखकनामापेक्षया ग्रन्थनामैव प्रसिद्ध्यति। केषाञ्चन प्राचीनग्रन्थानामुपरि बहुभिर्विद्वद्भिराचार्यैरनेकविधा व्याख्या रचिताः। एकस्यैव मूलग्रन्थस्यानेके व्याख्याग्रन्थाः प्रकाश्यन्ते बहुभ्यः स्थानेभ्यः। अत एवाधुनिकपद्धत्या गर्भटिप्पणी प्रदीयते चेत्तदाधारेण स्रोतःप्राप्त्यै पाठकैर्बहुकष्टः सोढव्यो भवति, किन्तु तन्न प्राप्यते। केचन ग्रन्थाश्च विभिन्नेषु काण्डेषु, पर्वसु, स्कन्धेषु, खण्डेषु, अध्यायेषु, परिच्छेदेषु वा विभक्ता भवन्ति। कुत्रचित्तु अध्याया विभिन्नेषु पादेष्वपि विभक्ता भवन्ति। तत्रापि श्लोकसंख्या सूत्रसंख्या च महत्त्वपूर्णा भवति। एतेषां तथ्यानामाधारेणैव सहजतया सम्बद्धा सामग्री प्राप्यते। एतादृशानामपि ग्रन्थानाम् एपिए-एमएलए-पद्धत्याधारेणोद्धरणक्रमे सम्पादक/व्याख्याकार/टीकाकार/अनुवादकानामन्त्यनाम, प्रकाशनवर्षः, पृष्ठसंख्या चेति तथ्यत्रयं प्रयुक्तं प्राप्यते, किन्तु तत्र संस्कृतशोधप्रतिवेदनगतगर्भटिप्पणीषु न सम्पादकादिनाम, अपि तु ग्रन्थनाम, ततः

मण्डलसूक्तमन्त्रसङ्ख्या (यथा- ऋग्वेदसंहिता १०।१२९।१) चेति तथ्यानामुल्लेखनमुपयुक्तं भवति (चौलागाईँ, २०८०, अनुच्छेदः ३२-३३)।

वस्तुतोऽपौरुषेयाणां/गौणीभूतलेखकानां, प्राचीनानाञ्च ग्रन्थानां कृत आधुनिकप्रणाल्या गर्भटिप्पणी कर्तुं न शक्यते । यदि कथञ्चित् शक्येत चेदपि सा नोपयुज्यते । अत एव तादृशानां ग्रन्थानां कृते गर्भटिप्पणी कथं कर्तव्येति कानिचिदुदाहरणानि **स्रोतोविरणेन साकं प्रस्तूयन्तेऽत्र** –

| **गर्भटिप्पणी** | **स्रोतोविरणम्** |
|---|---|
| (ऋग्वेदः, १।१५९।४) | ऋग्वेदस्य प्रथममण्डलस्य १५९ तमस्य सूक्तस्य चतुर्थमन्त्रः |
| (शुक्लयजुर्वेदः, १।१५) | शुक्लयजुर्वेदस्य प्रथमाध्यायस्य पञ्चदशो मन्त्रः |
| (सामवेदः, १।३।११) | सामवेदस्य प्रथमप्रपाठकस्य, तृतीयदशत्याः, एकादशो मन्त्रः |
| (अथर्ववेदः, १।१०।३) | अथर्ववेदस्य, प्रथमकाण्डस्य दशमसूक्तस्य तृतीयो मन्त्रः |
| (ईशा., ३) | ईशावास्योपनिषदः तृतीयो मन्त्रः |
| (कठोप., १।१।६) | कठोपनिषदः प्रथमाध्यायस्य प्रथमवल्याः षष्ठो मन्त्रः |
| (शतपथब्रा. १।१।१।१।१६) | शतपथब्राह्मणस्य प्रथमकाण्डस्य प्रथमप्रपाठकस्य प्रथमाध्यायस्य प्रथमब्राह्मणस्य षोडषो मन्त्रः |
| (ऐतरेया., २।३।५) | ऐतरेयारण्यस्य द्वितीयारण्यस्य तृतीयाध्यायस्य पञ्चमो मन्त्रः |
| (वा.रामा., अयो. का. , २६।६) | वाल्मीकीयरामायणस्य अयोध्याकाण्डस्य २६तमसर्गस्य षष्ठः श्लोकः |
| (म.भा., कर्ण., १।१३) | महाभारतस्य कर्णपर्वणः प्रथमाध्यायस्य त्रयोदशः श्लोकः |
| (श्रीमद्भागवतम्, १।२।२३) | श्रीमद्भागवतस्य प्रथमस्कन्धस्य द्वितीयाध्यायस्य त्रयोविंशतितमः श्लोकः |
| (श्रीदुर्गासप्तशती, १।५३-५८) | श्रीदुर्गासप्तशत्याः प्रथमाध्यायस्य ५३-५८ तमाः श्लोकाः |
| (वाक्यपदीयम्, ब्र. का. ३) | वाक्यपदीयस्य, ब्रह्मकाण्डस्य तृतीयः श्लोकः |
| (श्रीमद्भगवद्गीता, ४।६) | श्रीमद्भगवद्गीतायाः, चतुर्थाध्यायस्य षष्ठः श्लोकः |
| (पा.सू., ७।४।८२)<br>अथवा- (अष्टा., ७।४।८२) | पाणिनीयसूत्राष्टाध्याप्याः सप्तमाध्यायस्य चतुर्थपादस्य ८२ तमं सूत्रम् |
| (न्या. द., ३।२।४२) | न्यायदर्शनस्य तृतीयाध्यायस्य द्वितीयपादस्य ४२ तमं सूत्रम् |
| (पू.मी.सू., १२।१।४२) | पूर्वमीमांसासूत्रस्य द्वादशाध्यायस्य प्रथमपादस्य ४२ तमं सूत्रम् |
| (ब्र. सू., २।३।४२) | ब्रह्मसूत्रस्य द्वितीयाध्यायस्य तृतीयपादस्य ४२ तमं सूत्रम् |
| (आप. ध. सू., १।७।३०) | आपस्तम्बधर्मसूत्रस्य प्रथमप्रश्नस्य सप्तमकण्डिकायाः ३० तमं सूत्रम् |

गर्भटिप्पण्या उपर्युल्लिखितान्युदाहरणानि मुख्यतया 'संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणम्' (पौडेलः, २०८२, पृ. १४६-१६४) इत्यस्माल्लेखात् सङ्गृहीतानि । ग्रन्थानां संरचना भिन्नभिन्नशैल्या

विभिन्नखण्डोपखण्डादिषु विभज्य निर्मिता भवति, एतादृशानां ग्रन्थानाञ्च गर्भटिप्पणी एपिएशैल्या कर्तुं कथमपि न शक्यत इति ज्ञापनायात्रोदाहरणान्याधिक्येन प्रस्तुतानि । सर्वेषां ग्रन्थानां प्रकृतिः समाना न भवतीति ज्ञापनाय च **स्रोतोविरणमपि** प्रस्तुतम् ।

*सन्दर्भग्रन्थसूचीनिर्माणशैली*

संस्कृतवाङ्मयानुसन्धाने सन्दर्भग्रन्थसूचीनिर्माणाय कथंविधा शैली प्रयोक्तव्येत्यत्र विचारणात् पूर्वम् अधुना विश्वप्रसिद्धासु बहुतरप्रयुक्तासु च एपिए-एमएलए-सिकागोशैलीष्वेतद्विषये कीदृशी व्यवस्थास्तीति किञ्चित् चर्चयाम ।

**एपिएशैल्यनुसारेण सन्दर्भग्रन्थसूच्यां प्रविष्टिक्रमः :** एपिएशैल्यनुसारेण सन्दर्भग्रन्थसूच्यां पुस्तकानां **प्रविष्टिक्रमे-** लेखकान्त्यनाम, तत्प्रथमनाम, कोष्ठके प्रकाशनवर्षः, तिर्यग्वर्णेषु ग्रन्थस्य/सामग्र्याः शीर्षकं, स्रोतः (प्रकाशकनाम) चेति तथ्यान्युल्लेख्यानि । प्रकाशनस्थानोल्लेखनस्य व्यवस्था तु तत्र न दृश्यते (एपिए, २०२०, पृ. ३२९) । येषां ग्रन्थानां लेखकोऽज्ञातः, तेषां कृतीनां कृते सन्दर्भग्रन्थसूच्यां गर्भटिप्पण्यां च कृतिशीर्षकमेव लेखकस्थानं प्राप्नोति (एपिए, २०२०, २७८) । संस्कृतवाङ्मये वेदोपनिषदादीनामपौरुषेयत्वात्तेषां लेखका एव न सन्तीति तत्सन्दर्भे एपिएशैल्या व्यवस्थेयमुपयुक्ता भवति । यदि कश्चिद् ग्रन्थः अनलाइनमध्ये प्राप्तोऽस्ति चेत्तस्य लिङ्कपदवाच्यम् अणुस्रोतोऽपि दीयतेऽन्ते । यथा-

***पुस्तकसन्दर्भे :*** कर्गजमुद्रितपुस्तकानां सन्दर्भग्रन्थसूच्यां प्रविष्टिक्रम इत्थं भवति-

तिवारी, प्रकाशः (२०८१), *अनुसन्धानपद्धतिः*, सङ्गीता भण्डारी ।

***अन्तर्जालस्थपुस्तकसन्दर्भे :*** यानि पुस्तकान्यन्तर्जाले प्राप्यन्ते, तेषां सन्दर्भग्रन्थसूच्यां प्रविष्टिक्रम इत्थं भवति-

विश्वनाथः (१९५७), *साहित्यदर्पणः*, चौखम्बा विद्या भवन ।
https://archive.org/details/in.ernet.dli.2015.326843/mode/1up

***अप्रकाशितशोधप्रबन्धसन्दर्भे :*** सन्दर्भग्रन्थसूच्याम् अप्रकाशितशोधप्रबन्धानां प्रविष्टिक्रमे- शोधकर्तृनाम (प्रथमम् अन्त्यनाम, तत आद्यनाम), लघुकोष्ठके प्रस्तुतिवर्षः, तिर्यग्वर्णेषु शोधप्रबन्धशीर्षकम्, स्थूलकोष्ठके 'अप्रकाशित-विद्यावारिधि/स्नातकोत्तर-शोधप्रबन्धः' इत्युल्लेखः, स्थूलकोष्ठकाद्बहिरुपाधिप्रदायकसंस्थायाः/विश्वविद्यालयस्य नामोल्लेखश्चेति तथ्यान्युल्लेख्यानि (एपिए, २०२०, पृ. ३३७-३३८) । यथा-

पौडेलः, लीलानाथः (२०६४), *व्याकरणदृष्ट्या हरिकेलिमहाकाव्यस्य समीक्षणम्* [अप्रकाशितो विद्यावारिधिशोधप्रबन्धः], नेपालसंस्कृतविश्वविद्यालयः ।

***प्रकाशितशोधप्रबन्धसन्दर्भे :*** प्रकाशितशोधप्रबन्धानां प्रविष्टिक्रमे- शोधकर्तृनाम (प्रथमम् अन्त्यनाम, तत आद्यनाम), लघुकोष्ठके प्रस्तुतिवर्षः, तिर्यग्वर्णेषु शोधप्रबन्धशीर्षकम्, स्थूलकोष्ठके 'विद्यावारिधि/स्नातकोत्तर-शोधप्रबन्धः'

इत्युल्लेखः, उपाधिप्रदायकसंस्थायाः/विश्वविद्यालयस्य नामोल्लेखश्च, ततः प्रकाशकनाम (यथा- शोधगंगा, शोधगंगोत्रीत्यादि), अन्ते लिङ्कपदवाच्यम् अणुस्रोतश्चेति तथ्यान्युल्लेख्यानि (एपिए, २०२०, पृ. ३३७-३३८)। तदनुसारेण च संस्कृते इत्थं भवति –

रेग्मी, सत्यराजः (ई. २०१९), *पाणिनीयव्याकरणव्युत्पत्तिदृशा शुक्लयजुर्वेदीयरुद्राष्टाध्यायीमन्त्राणां परिशीलनम्* [विद्यावारिधिशोधप्रबन्धः, राष्ट्रियसंस्कृतसंस्थानम्]। Shodhganga. http://hdl.handle.net/10603/389260

***शोधपत्रिकासन्दर्भे* :** शोधपत्रिकाणां प्रविष्टिक्रमे- लेखकनाम, प्रकाशनवर्षः/दिनाङ्काः, लेखशीर्षकम्, तिर्यग्वर्णेषु शोधपत्रिकानाम, अङ्कः, लेखव्याप्तपृष्ठाङ्काः, लिङ्कपदवाच्यम् अणुस्रोतश्चेति तथ्यान्युल्लेख्यानि (एपिए, २०२०, पृ. ३२६)। एतदनुसारेण च संस्कृते प्रविष्टिक्रमोदाहरणमित्थं भवति-

पौडेलः, हरिलालः (२०८२), संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणम्, *कालिकाप्रभा* ३, १४६-१६४। NepJOL. https://doi.org/10.3126/kp.v3i3.84498

**एमएलएशैल्यनुसारेण सन्दर्भग्रन्थसूच्यां प्रविष्टिक्रमः :** एमएलएपद्धतौ सन्दर्भग्रन्थसूच्यां मुख्यतया पुस्तकानामुद्धरणे कृते लेखकान्त्यनाम, तत्प्रथमनाम, तिर्यग्वर्णेषु ग्रन्थशीर्षकम्, प्रकाशकनाम, प्रकाशनवर्षश्चेति तथ्यानि प्रदीयन्ते। प्रकाशनस्थानोल्लेखनस्य व्यवस्था त्वत्रापि न दृश्यते (एमएलए, २०२१, पृ. ३६१)। तदनुसारेण च संस्कृते प्रविष्टिक्रमोदाहरणमित्थं भवति –

त्रिपाठी, भागीरथीप्रसादः, *अनुसन्धानपद्धतिः*, वाराणसेय संस्कृतविश्वविद्यालयः, १९३९।

एमएलएशैल्यनुसारेण सन्दर्भग्रन्थसूच्यां शोधप्रबन्धानां प्रविष्टिक्रमे च- शोधकर्तुरन्त्यनाम, तत्प्रथमनाम, तिर्यग्वर्णेषु शोधप्रबन्धशीर्षकम्, प्रस्तुतिवर्षः, विश्वविद्यालयनाम, शोधप्रबन्धप्रकारः (विद्यावारिधेः/स्नातकोत्तरस्य वेति), अन्ते प्रकाशक/अन्तर्जाल-सङ्ग्राहकनाम, लिङ्कपदवाच्यम् अणुस्रोतश्चेति तथ्यान्युल्लेख्यानि (एमएलए, २०२१, पृ. ४०१)। तदनुसारेण च संस्कृत इत्थं भवति–

रेग्मी, सत्यराजः, *पाणिनीयव्याकरणव्युत्पत्तिदृशा शुक्लयजुर्वेदीयरुद्राष्टाध्यायीमन्त्राणां परिशीलनम्*, २०१९, राष्ट्रियसंस्कृतसंस्थानम्, विद्यावारिधिशोधप्रबन्धः। Shodhganga. http://hdl.handle.net/10603/389260

शोधपत्रिकाणामुद्धरणे कृते च- लेखकान्त्यनाम, तत्प्रथमनाम, युगलोद्धरणचिह्ने शोधलेखशीर्षकम्, तिर्यग्वर्णेषु शोधपत्रिकानाम, अङ्कः (Volume), प्रकाशनमासः (उल्लिखितोऽस्ति चेत्), प्रकाशनवर्षः, लेखव्याप्तपृष्ठसंख्याः, अन्तर्जालक-सङ्ग्राहकनाम, लिङ्कपदवाच्यमणुस्रोतश्चेति तथ्यानि प्रदीयन्ते (एमएलए, २०२१, ३५९)। तदनुसारेण संस्कृत इत्थं भवति–

आचार्यः, पुरुषोत्तमः, “न्यायवैशेषिकयोरभावमीमांसा”, *हैमप्रभा* २३, २०८०, ७०-८१ । NepJOL. https://doi.org/10.3126/haimaprabha.v23i1.66731

**सिकागोशैल्यनुसारेण सन्दर्भग्रन्थसूच्यां प्रविष्टिक्रमः :** सिकागोशैल्यनुसारेण सन्दर्भग्रन्थसूचीनिर्माणक्रमो यथा –

ग्रन्थानां कृते- लेखकान्त्यनाम, तत्प्रथमनाम, तिर्यग्वर्णेषु ग्रन्थनाम, प्रकाशकनाम, प्रकाशनवर्षश्चेति (सिकागो, २०२४, पृ. ७८५) । यथा –

त्रिपाठी, विजयप्रसादः, *समासवृत्तिविमर्शः*, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०४७ ।

शोधप्रबन्धानां प्रविष्टिक्रमे च- शोधकर्तुरन्त्यनाम, तत्प्रथमनाम, युगलोद्धरणचिह्नमध्ये शोधप्रबन्धशीर्षकम्, शोधप्रबन्धप्रकारः (विद्यावारिधि-स्नातकोत्तरादिः), विश्वविद्यालयनाम, प्रस्तुतिवर्षः । लिङ्कपदवाच्यम् अणुस्रोतश्चेति तथ्यानि प्रदीयन्ते (google /Theses and dissertations) । तदनुसारेण च संस्कृते इत्थं भवति –

रेग्मी, सत्यराजः, “पाणिनीयव्याकरणव्युत्पत्तिदृशा शुक्लयजुर्वेदीयरुद्राष्टाध्यायीमन्त्राणां परिशीलनम्”, विद्यावारिधिशोधप्रबन्धः, राष्ट्रियसंस्कृतसंस्थानम्, २०१९ । Shodhganga, http://hdl.handle.net/10603/389260

शोधपत्रिकाणां कृते- लेखकान्त्यनाम, तत्प्रथमनाम, युगलोद्धरणचिह्ने शोधलेखशीर्षकम्, तिर्यग्वर्णेषु शोधपत्रिकानाम, अंकसंख्या (Volume), कोष्ठके प्रकाशनवर्षः, बिन्दुद्वयात्मकनिर्देशचिह्नं, सम्बद्धलेखव्याप्तपृष्ठसंख्याश्चेति । प्रकाशनमासो न तावदनिवार्यः (सिकागो, २०२४, पृ ७८७) । यथा –

पौडेलः, हरिलालः, “संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणम्”, *कालिकाप्रभा* ३, (वै. २०८२) : १४६-१६४ । NepJOL. https://www.nepjol.info/index.php/kalikaprabha/article/view/84498/64477

**तिसृणां शैलीनां तुलना समीक्षा च :** पुस्तकानां सन्दर्भसूचीप्रविष्टिसन्दर्भे प्रकाशनवर्षं विहायान्यतथ्यप्रविष्टिक्रमः तिसृष्वपि शैलीषु समानः । तत्र एपिएशैल्यां लेखकनामानन्तरं प्रकाशनवर्षः, अन्ययोस्त्वन्त्ये । शोधप्रबन्धानां सन्दर्भसूचीप्रविष्टिसन्दर्भे तिसृष्वपि शैलीषु पृथक् पृथक् व्यवस्था दृश्यते । तत्र कस्याप्यनुकरणे न काप्यापत्तिः, किन्त्वेकरूपतायै प्रस्तुतेः/प्रकाशनवर्षस्य प्रविष्टिरन्त्ये कर्तव्या, यतो हि संस्कृतानुसन्धाने तथैवोपयुक्तं भवति । किञ्च नेपाले वैक्रमाब्दस्य, भारते वैक्रमाब्दस्य क्रैस्ताब्दस्य च, अन्येषु देशेषु च क्रैस्ताब्दस्यैव प्रचलनमस्तीति पुस्तकादिषु प्रकाशनवर्षरूपेण यथाप्रचलनं तत्तदब्दोल्लेखः क्रियते । सन्दर्भसूचीप्रविष्टिक्रमे च वैक्रमाब्द-क्रैस्ताब्दयोः सङ्केतो न क्रियते चेत्तद्विषये भ्रमो भवति । अत एव तत्सङ्केतोऽपि कर्तव्यः । तस्य कृते च वैक्रमाब्दश्चेत् वै. इति, क्रैस्ताब्दश्चेत् क्रै. इति ई. इति वा सङ्केत्यैव प्रकाशनवर्षोल्लेख कर्तव्यः । शोधप्रबन्धप्रकारः कोष्ठके स्थापनीयः, उपाधिप्रदायकसंस्थानाम्नस्तु तु कोष्ठकं विनैव स्थापनमुचितम् । शोधपत्रिकाणां सन्दर्भसूचीप्रविष्टिसन्दर्भे त्रिष्वपि शैलीषु प्रकाशनवर्षोल्लेखनरीतिं, तत्स्थानं,

लेखशीर्षके चिह्नप्रयोगं च विहाय प्रायः साम्यं दृश्यते । तत्र शोधलेखव्याप्तपृष्ठसंख्या अन्त्ये प्रदातव्येति व्यवस्था त्रिष्वपि शैलीषु दृश्यते, किन्त्वेकरूपतायै- पत्रिकानाम-तदङ्कोल्लेखानन्तरं कोष्ठके शोधलेखव्याप्तपृष्ठसंख्यया: प्रदाय प्रकाशनवर्षोऽन्त्ये दीयते चेच्छोभनं भवेत् ।

तिसृष्वपि शैलीषु प्रायः सन्दर्भग्रन्थसूचीप्रविष्टिक्रमे सर्वप्रथमं लेखकनाम एव दातव्यमिति व्यवस्था दृश्यते । एपिएशैल्यनुसारेण येषां ग्रन्थानां लेखकोऽज्ञातः, तेषां कृते सन्दर्भग्रन्थसूच्यां गर्भटिप्पण्यां च ग्रन्थशीर्षकमेव लेखकस्थानं प्राप्नोति (एपिए, २०२१, २७८) । संस्कृतवाङ्मये वेदोपनिषदादीनामपौरुषेयत्वात्तेषां लेखका एव न सन्तीति तत्सन्दर्भे एपिएशैल्या व्यवस्थेयमुपयुक्ता भवति । किञ्च पुराणानामपि पराशरव्यासादिरचितत्वेऽपि तानि खलु स्वनाम्नैव प्रसिद्धानि सन्तीति तत्र लेखकनामोल्लेखनस्यानिवार्यता न भवति । किञ्च यदि गर्भटिप्पणी लेखकनामतः प्रारब्धास्ति चेदेव सन्दर्भग्रन्थसूच्यपि लेखकनामतः प्रारभ्यते । लेखकनामतो गर्भटिप्पणी प्रारभ्यते चेत् तत्पश्चात् प्रकाशनवर्षः, ततः पृष्ठसंख्या लिखितव्या भवति, किन्तु तया पद्धत्या पुराणादिभ्यो गृहीतानां सामग्रीणां मूलस्रोतःप्राप्तौ काठिन्याधिक्यं भवति । तेषां तु ग्रन्थनाम, स्कन्धकाण्डपर्वादिसंख्या, अध्यायसंख्या, श्लोकसंख्या चेति क्रमेण टिप्पणी प्रदातव्या भवति । अतस्तेषां कृते सन्दर्भग्रन्थसूचीप्रविष्टिक्रमेऽपि सर्वप्रथमं ग्रन्थनाम एव प्रदातव्यं भवति । एतद्विषये प्रेमप्रसाद चौलागाईँ इत्यनेन महोदयेन *'अनुसन्धान पद्धति : सिद्धान्त र प्रयोग'ले कोरेको शोधको सैद्धान्तिक र प्रायोगिक मार्गचित्र* इत्यस्मिँल्लेखे प्रस्तुतमतस्यानुवाद इत्थमस्ति –

संस्कृतवाङ्मयानुसन्धानस्य सन्दर्भसामग्रीसूचीविन्यासक्रमे ग्रन्थनाम, प्रकाशनवर्षः, सम्पादकनाम, प्रकाशकनाम [यथा- ऋग्वेदसंहिता, (पञ्चमसंस्करणम्, ई. १९४६), सम्पा. नारायण सोनटक्के, वैदिक संशोधन मण्डल] इति तथ्यानि दीयन्ते चेदुत्तरवर्तिनामनुसन्धातॄणां कृते सामग्र्युपलब्धतादृष्ट्या तस्याः सूच्याः व्यवस्थिततत्वमुपयोगित्वञ्च दृश्यते । एवमेव एपिएपद्धत्यां लेखकनामानन्तरं, प्रकाशनवर्षानन्तरं, ग्रन्थनामानन्तरञ्च प्रयुक्तस्य बिन्दुचिह्नस्य स्थाने नेपालीभाषाप्रकृत्यनुसारेण (संस्कृतभाषाप्रकृत्यनुसारेण च) अल्पविरामचिह्नप्रयोग उपयुज्यते (चौलागाईँ, २०८०, अनुच्छेदः ३२-३३ ) ।

चौलागाईँमहोदयस्य मतमिदमुपयुक्तं दृश्यते, किन्तु तत्र विचारितव्यमस्ति यत्- संस्कृतवाङ्मये सम्पादितग्रन्थानामाधिक्यं भवति, अत एव सम्पादकप्रधानानां ग्रन्थानां सन्दर्भे प्रथमं सम्पादकनाम दत्त्वा कोष्ठके 'सम्पा.' इति लेखनपरिपाटी विद्यते । ततश्च पुनः कोष्ठके प्रकाशनवर्षो लिख्यते चेदेककोष्ठकानन्तरं पुनरत्यत्कोष्ठकं प्रदातव्यं भवति । यथा– 'गोयन्दका, हरिकृष्णदास, (सम्पा.) (२०६८), ईशादि नौ उपदिषद् गीताप्रेस ।' इति ।

तादृशप्रयोगमपि केचित् कुर्वन्त्युदाहरन्ति च (घोडासैनी, २०७९, पृ ५८), किन्तु तदपेक्षया प्रकाशनवर्षस्यान्ते स्थापनमेव शोभते, उपयुज्यते च । ग्रन्थप्रधानानां ग्रन्थानां सन्दर्भे तु ग्रन्थनामानन्तरं 'सम्पा.' 'टी.' 'व्या.' इत्यादिसङ्केतेषु कोष्ठकप्रयोगं न कृत्वैव सम्पादकादिनाम दीयत इति तत्सन्दर्भे तु तथा कृते सत्यपि नापत्तिः । ग्रन्थनामानन्तरं प्रकाशनवर्षलेखनमप्येको विकल्पो भवितुं शक्नुयात्, किन्तु तस्याधिकः प्रयोगो न दृश्यते । अत एव प्रकाशनवर्षोऽन्त्ये दीयते चेत् सारल्यं भवति, शोभनञ्च दृश्यते । संस्कृतवाङ्मयसम्बद्धस्यैकस्यैव लेखकस्यैक एव ग्रन्थो भिन्नभिन्नस्थानेभ्यः प्रकाशितो भवितुं शक्नोति, तदनुसारेण च ग्रन्थस्वरूपं भिन्नायितुं शक्नोतीति प्रकाशनस्थानोल्लेखोऽप्यावश्यकः ।

इत्थञ्च संस्कृतवाङ्मयसम्बद्धानुसन्धानप्रबन्धलेखादिषु प्रकाशनवर्षस्थापनविषये एपिएशैल्यपेक्षया एमएलएशैल्युपयुक्ता दृश्यते । यद्यपि संस्कृतवाङ्मयानुसन्धानस्य पृथग् वैशिष्ट्यमस्तीति एमएलएशैलीनिकटत्वेऽप्यस्या नाम तु संस्कृतशैलीत्येव वक्तव्यम् । अत एव संस्कृतवाङ्मयसम्बद्धानुसन्धाने सन्दर्भग्रन्थसूचीप्रविष्टिक्रमे कथंविधः क्रमोऽवलम्बनीय इति विषये प्रस्तावोऽत्र प्रस्तूयते –

## *संस्कृतवाङ्मयसम्बद्धानुसन्धानप्रबन्धलेखादिषु सन्दर्भग्रन्थसूचीनिर्माणशैली*

सन्दर्भग्रन्थप्रकृत्यनुसारेण सन्दर्भग्रन्थसूचीनिर्माणक्रमे प्रयुज्यमानः प्रविष्टिक्रमः भिन्नायते । अत एवात्र ग्रन्थप्रकृत्यनुसारेणैव तत्प्रविष्टिक्रमः प्रस्तूयते-

**लेखक/सम्पादकप्रधानानां सामग्रीणां प्रविष्टिक्रमः :** संस्कृतवाङ्मयसम्बद्धानुसन्धानप्रबन्धलेखादिषु सन्दर्भग्रन्थसूचीप्रविष्टिक्रमे लेखक/सम्पादकप्रधानानां पुस्तकानां, शोधप्रबन्धानां, शोधपत्रिकाणाञ्च प्रविष्टिक्रम निम्नलिखितानुसारेण भवति-

***पुस्तकानां प्रविष्टिक्रमः :*** सन्दर्भग्रन्थसूच्यां पुस्तकानां प्रविष्टिक्रमे सर्वप्रथमं लेखक/सम्पादकनाम (प्रथमं थरपदवाच्यं पारिवारिकनाम/ अन्त्यनाम, ततो नाम), सम्पादकप्रधानो ग्रन्थोऽस्ति चेत् कोष्ठके 'सम्पा.' इति लिखितव्यम्, टीकाकारप्रधानश्चेत् कोष्ठके 'टी.' इति, व्याख्याकारप्रधानश्चेत् कोष्ठके 'व्या.' इति लिखितव्यम्, ततो ग्रन्थशीर्षकम्, ततः प्रकाशनस्थानम्, ततः बिन्दुद्वयात्मकं सापेक्षविरामचिह्नं दत्त्वा प्रकाशकनाम, ततः प्रकाशनवर्षश्चेति पञ्च प्रमुखतत्त्वानि समावेश्यानि । अन्त्ये पूर्णविरामः प्रदातव्यः । यथा –

आचार्यः, वरदराजः, मध्यसिद्धान्तकौमुदी, वाराणसी : चौखम्बा अमरभारती प्रकाशन, २०४७।

नागेशः, वैयाकरणसिद्धान्तलघुमञ्जूषा (प्रथमो भागः), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, २०४७।

सरस्वती, स्वामी सत्यानन्दः (व्या.), ब्रह्मसूत्रशाङ्करभाष्यम् (भाषानुवाद-सत्यानन्दी-दीपिका-समलङ्कृतम् ), दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, ई. २०१४।

विठ्ठलाचार्यः(टी.), प्रक्रियाकौमुदी (प्रसादटीकायुता), प्रथमो भागः : https://archive.org/details/prakriyakaumudi/mode/1up

***शोधप्रबन्धानां प्रविष्टिक्रमः :*** सन्दर्भग्रन्थसूच्यां शोधप्रबन्धानां प्रविष्टिरनेन क्रमेण कर्तव्या-

रेग्मी, सत्यराजः, *पाणिनीयव्याकरणव्युत्पत्तिदृशा शुक्लयजुर्वेदीयरुद्राष्टाध्यायीमन्त्राणां परिशीलनम्* (विद्यावारिधिशोधप्रबन्धः), राष्ट्रियसंस्कृतसंस्थानम्, ई. २०१९ । Shodhganga, http://hdl.handle.net/10603/389260

***शोधपत्रिकाणां प्रविष्टिक्रमः :*** सन्दर्भग्रन्थसूच्यां शोधपत्रिकाणां प्रविष्टिरनेन क्रमेण कर्तव्या-

पौडेलः, हरिलालः, "संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणम्", *कालिकाप्रभा* ३ (१४६-१६४), वै. २०८२। https://www.nepjol.info/index.php/kalikaprabha/article/view/84498/64477

***ग्रन्थप्रधानानां ग्रन्थानां प्रविष्टिक्रमः*** वेदोपनिषदोऽपौरुषेयत्वात्, पुराणादयः सूत्रग्रन्थाश्च पौरुषेयत्वेऽपि ग्रन्थनाम्नैव प्रसिद्धतरत्वाद् ग्रन्थप्रधानत्वेन ज्ञायन्ते। एतेषां कृते सन्दर्भग्रन्थसूचीप्रविष्टावयं क्रमोऽवलम्बनीयः-

ग्रन्थनाम, लेखकोऽस्ति चेत्तन्नाम लिखित्वा अमुकप्रणीतमिति/सम्पादकोऽस्ति चेत् सम्पा. इति लिखित्वा तन्नाम, ततः प्रकाशनस्थानम्, ततः प्रकाशकनाम, ततः प्रकाशनवर्षश्चेति चत्वारि पञ्च वा प्रमुखतत्त्वानि समावेश्यानि । अन्त्ये पूर्णविरामः प्रदातव्यः । यथा –

अग्निपुराणम्, महर्षिवेदव्यासप्रणीतम्, वाराणसी : चौखम्बा संस्कृत सीरीज आफिस, सन् १९६६।

अथर्ववेद, सम्पा.- डा. गंगा सहाय शर्मा, नई दिल्ली : संस्कृत साहित्य प्रकाशन, ई. २०१५।

ईशादि नौ उपदिषद्, सम्पा.- हरिकृष्णदास गोयन्दका, गोरखपुर : गोविन्दभवन कार्यालय, गीताप्रेस, २०६८।

ऋग्वेदसंहिता, श्रीमत्सायणाचार्यविरचितभाष्यसमेता, प्रथमण्डलात्मकः प्रथमो भागः, पूना-२, भारतम् : वैदिक-संशोधन-मण्डलम्, तिलक-स्मारक- मन्दिरम्, ई. १९३३।

पाणिनीयसूत्रपाठः (अष्टाध्यायी), सम्पा.- हरिवंशकुमारपाण्डेयः, वाराणसी : भारतीय विद्या संस्थान,२०४७।

सन्दर्भग्रन्थसूच्या उपर्युल्लिखितान्युदाहरणानि मुख्यतया 'संस्कृतवाङ्मयस्थसमास-प्रयोगस्यैतिहासिकं सर्वेक्षणम् (पौडेल, २०८२, पृ. १४६-१६४) इत्यस्माल्लेखात् सङ्गृहीतानि।

**सन्दर्भग्रन्थसूचीप्रविष्टिकमे चिह्नप्रयोगः** एपिएशैलीपुस्तिकायां सन्दर्भग्रन्थसूच्यां दीयमानाः पुस्तक-शोधप्रबन्ध-शोधपत्रिकासम्बद्धा सूचनाः सारणीकृत्य उदाहरणरूपेण प्रस्तुताः। तत्र सारण्यां ताः सूचनाः लेखक : / सम्पादकः, प्रकाशनवर्षः, सामग्रीशीर्षकम्, सोतश्चेति कृत्वा चतुर्षु खण्डेषु विभक्ताः प्रतिखण्डान्तञ्च समाप्तिसूचकं बिन्दुचिह्नं प्रदत्तम् (एपिए, २०२०, पृ. २२९) । यथा संस्कृतनेपाल्यादिषु देवनागरीलिपि-सम्बद्धासु भाषासु वाक्यसमाप्तौ पूर्णविरामचिह्नं प्रयुज्यते, तथैवाङ्ग्लभाषायां हि वाक्यसमाप्तौ 'फुलस्टप'पदवाच्यं बिन्दुचिह्नं प्रयुज्यते । अत्र सन्दर्भे च बिन्दुचिह्नं खण्डसमाप्तिसूचकं लोपसूचकञ्च। आङ्ग्लभाषायां लेखकादेः प्रथमद्वितीयनाम्न आद्यक्षराण्येव लिखित्वा कानिनिदक्षराणि लुप्तानि सन्तीति बोधनाय लोपसूचकं बिन्दुचिह्नं प्रयुज्यते। संस्कृते तु लेखकनाम सम्पूर्णमेव लिख्यत इति तस्य प्रयोगो नावश्यकः। अत एव आङ्ग्लभाषायां यत्र यत्र खण्डसमाप्तिसूचकं बिन्दुचिह्नं प्रयुज्यते, संस्कृते तत्र तत्र पूर्णविरामचिह्नं प्रयोक्तुं शक्यते, यद्यपि प्रचलनं किञ्चिद् भिन्नमस्ति। एकसन्दर्भसम्बद्धसर्वसूचनासमाप्तावेव पूर्णविरामः, खण्डसमाप्तौ त्वल्पविराम इति प्रचलनं दृश्यते ( पोखरेल, २०२३, पृ ४५ ) । प्रचलनमाधृत्यैवोपरि प्रस्तावितेषु निदर्शनेषु प्रतिखण्डान्तमल्पविरामचिह्नमेव प्रयुक्तम्। केचन तु एपिएशैलीमनुसृत्य खण्डसमाप्तावपि बिन्दुचिह्नं प्रयुञ्जते (घोडासैनी, २०७९, पृ ५९)। वस्तुतो देवनागरीलिपिसम्बद्धभाषासु बिन्दोर्विरामचिह्नत्वाभावात् खण्डसमाप्तौ पूर्णविरामप्रयोग एवोचितः। लिंकपदवाच्याणुसङ्केतानन्तरन्तु चिह्नप्रयोगो न क्रियते, यद्यप्येतद्विषयेऽपि विमर्शः कर्तुं शक्यते । अत एवात्र सन्दर्भसामग्रीसूच्यां चिह्नप्रयोगः कथं कर्तुं शक्यत इति प्रस्तावरूपेणोपस्थाप्यते –

एपिएशैल्यनुकरणे - लेखकान्त्यनाम, लेखकप्रथमद्वितीयनाम, कोष्ठके वै./क्रै. इति संकेतः प्रकाशनवर्षश्च, पूर्णविरामचिह्नम्, ततः पुस्तकनाम, भागखण्डादिविवरणम्, तस्य संस्करणादिकम्, पूर्णविरामचिह्नम्, ततः तत्स्रोतः (प्रकाशकनाम), पूर्णविरामचिह्नम्, अन्त्ये लिंकपदवाच्यमणुस्रोतः (अस्ति चेत्) इति। यथा –

दीक्षितः, भट्टोजिः (क्रै. १९९७) । वैयाकरणसिद्धान्तकौमुदी, बालमनोरमाव्याख्यया समलङ्कृता, दीपिकाख्यहिन्दीव्याख्योपेता च (समासादिद्विरुक्तान्तो द्वितीयो भागः, तृतीयं संस्करणम्)। चौखम्बा सुरभारती प्रकाशन।

संस्कृतस्य मौलिकशैलीप्रयोगे लेखकप्रधानानां पुस्तकानां कृते- लेखकान्त्यनाम, लेखकप्रथमद्वितीयनाम, पूर्णविरामचिह्नम्, ततः पुस्तकनाम, भागखण्डादिविवरणम्, तस्य संस्करणादिकम्, पूर्णविरामचिह्नम्, ततः तत्स्रोतः (प्रकाशनस्थानम्, ततः बिन्दुद्वयात्मकं सापेक्षविरामचिह्नं दत्त्वा प्रकाशकनाम), ततः वै. / क्रै. इति संकेतः प्रकाशनवर्षश्च, पूर्णविरामचिह्नम्, अन्त्ये लिंकपदवाच्यमणुस्रोतश्च ( अस्ति चेत्) इति। यथा -

दीक्षितः, भट्टोजिः। वैयाकरणसिद्धान्तकौमुदी, बालमनोरमाव्याख्यया समलङ्कृता, दीपिकाख्यहिन्दीव्याख्योपेता च (समासादिद्विरुक्तान्तो द्वितीयो भागः, तृतीयं संस्करणम्)। वाराणसी : चौखम्बा सुरभारती प्रकाशन, क्रै. १९९७।

**उपशीर्षकादिषु संख्याङ्कनस्यावश्यकता**

शोधप्रबन्धगतेषु शोधलेखगतेषु चोपशीर्षकेषूपोपशीर्षकादिषु च संख्याङ्कनं कर्तव्यमिति परम्परास्ति, किन्त्वधुना तत् कर्तव्यं न वेत्यत्र विवदन्ते विद्वांसः । नेपालसंस्कृतविश्वविद्यालयानुसन्धानकेन्द्रात् प्रकाशितायाः 'अनुसन्धान प्रकाश' नाम्न्याः पत्रिकायाः 'शोध प्रबन्ध सङ्गठनको प्रारूप' इति शीर्षके द्वितीये परिशिष्टे शोधप्रबन्धगतेषु उपशीर्षकेषूपोपशीर्षकादिषु चाङ्काङ्कनं कर्तव्यमित्युल्लिखितं दृश्यते (दहालः, अन्ये च, २०७३, पृ. १५४)। तिवारी (२०८१) अपि 'अनुसन्धानपद्धति'नामके स्वकीयग्रन्थे तस्यावश्यकत्वं दृष्ट्वा शोधप्रबन्धगतोपशीर्षकाणामुपोपशीर्षकाणाञ्च समायोजनसरणिं प्रस्तुवन् तत्र सङ्ख्याङ्कनं समाविष्टवानस्ति (पृ. ६८)।

उपशीर्षकादीनां संयोजनं कथं कर्तव्यमिति विषये 'पब्लिकेसन म्यानुअल अफ द अमेरिकन साइकोलोजिकल एसोसिएसन (Publication Manual of the American psychological association)' इति नामके एपिएशैलीपुस्तके सोदाहरणं सम्यग् वर्णितं दृश्यते। तत्र हि शोधलेखगतानामुपशीर्षकाणामुपोपशीर्षकादीनाञ्च पञ्चस्तरीयं स्वरूपं चर्चितं, किन्तु तेष्वङ्काङ्कनं न कर्तव्यमित्याशयः प्रकटितः, यतो हि तत्र तद्विषये किमपि निर्देशनं न दत्तम्, निदर्शनरूपेण प्रस्तुते लेखेऽप्युपशीर्षकेष्वङ्काङ्कनं न विहितम् ( एपिए, २०२०, पृ. ५९-७६)। 'एपिए सातौँ संस्करणका प्रावधानहरू' इति शीर्षके शोधलेखे घोडासैनी (२०७९) अपि तदेवाशयं प्रकटितवान् (पृ. ४८), स्वकीयशोधलेखे तत् त्यक्त्वा व्यावहारिकरूपेणापि तत् प्रतिपादितवान् (पृ. ४२-५९)। एपिएशैलीपुस्तिकायामुपशीर्षकादीनां पञ्चस्तरीयं स्वरूपं निम्नानुसारेण प्रदत्तमस्ति :

| उपशीर्षकादीनां स्तरः | ( Level ) स्वरूपम् ( Format ) | मूलपाठप्रारम्भः |
|---|---|---|
| १ | केन्द्रीकरणम्, प्रगाढीकरणम्, | नवीनानुच्छेदरूपेण |
| २ | वामतः स्थापनम्, प्रगाढीकरणम्, | नवीनानुच्छेदरूपेण |
| ३ | वामतः स्थापनम्, प्रगाढीकरणं, तिर्यक्करणम्, | नवीनानुच्छेदरूपेण |
| ४ | पञ्चस्थानं (1tab) त्यक्त्वा वामतः स्थापनम्, प्रगाढीकरणम्, विरामचिह्नम् | समानानुच्छेदरूपेण |
| ५ | पञ्चस्थानं (1tab) त्यक्त्वा वामतः स्थापनम्, प्रगाढीकरणम्, तिर्यक्करम्, विरामचिह्नम् | समानानुच्छेदरूपेण |

(एपिए, २०२०, पृ. ५९)

अत्र प्रसङ्गे विरामचिह्नं नाम किमिति शंकोदेति। एपिएशैलीपुस्तिकायां Ending with a period इत्युक्तमस्ति। period इति शब्दस्यार्थश्च पूर्णविरामः (fullstop) इति भवति। देवनागरीलिपिसन्दर्भे त्वेतादृशोपशीर्षकानन्तरं बिन्दुद्वयात्मकं सापेक्षविरामचिह्नमुपयुज्यते (पोखरेलः, २०२३, पृ. ३१)। पञ्चस्थानमित्युक्ते तु ०.५ इन्चपरिमितं स्थानं बोध्यम्। घोडासैनीमहोदयस्य लेखे तूपशीर्षकादीनां पञ्चस्तरीयस्वरूपवर्णने त्रुटिर्दृश्यते। तत्र तृतीय-चतुर्थ-पञ्चमस्तराणामुपशीर्षकाणां सम्बन्धे एपिएशैली-विरुद्धाऽपर्याप्ता च सूचना प्रदत्ता (घोडासैनी, २०७९, पृ. ४८) दृश्यते।

यद्यपि एपिएशैलीपुस्तके उपशीर्षकेषूपोपशीर्षकादिषु संख्याङ्कनं न कर्तव्यमित्याशयः सोदाहरणं प्रकटितः, किन्तु तस्मिन्नेव पुस्तके प्रस्तुतेषूपशीर्षकेषु संख्याङ्कनं विहितं दृश्यते (एपिए, २०२०, पृ. २४-३८३)। **नेपजोल(NepJOL)- मध्ये प्रकाशितासु अन्वेषणा-हैमप्रभा-कौमोदकी-शोधसुधा-प्रज्ञाज्योति-कालिकाप्रभादिषु शोधपत्रिकासु ये शोधलेखाः समाविष्टाः सन्ति, तेषु संख्याङ्कनं न विहितं प्राप्यते । वैज्ञानिकानुसन्धानेषु कैश्चित् पाश्चात्यैरिदानीमपि स्वकीयशोधप्रबन्धगतोपशीर्षकादिषु संख्याङ्कनं कृतं दृश्यते। युनिभर्सिटी अफ मिचिगन (University of Michigan) इति नामकस्य विश्वविद्यालयस्य आइडिन जाबोली (Aydin Zaboli) इत्यनेन शोधकर्त्रा स्वकीयविद्यावारिधि-शोधप्रबन्धगतोपशीर्षकेषु बिन्दुत्रयसहितं स्तरचतुष्टयात्मकं यावत् संख्याङ्कनं ( यथा- 2.1.3.2 इत्यादि ) विहितं दृश्यते** (Zaboli, 2025, पृ. 30)। किञ्च संस्कृतवाङ्मयस्य शैली विशिष्टा, पृथक् चास्ति, यत्र संख्याङ्कनं महत्त्वपूर्णमस्ति। ऋग्वेदस्य मन्त्रा दशसु मण्डलेषु, विभिन्नेषु सुक्तेषु च विभक्ताः सन्ति। यजुर्वेदमन्त्राश्चत्वारिंशदध्यायेषु, सामवेदमन्त्राः प्रपाठकेषु दशतीषु च, अथर्ववेदमन्त्राः काण्डेषु सुक्तेषु च विभक्ताः सन्ति। उपनिषन्मन्त्रा अपि खण्ड-प्रश्न-अध्याय-वल्ल्यनुवाकादिषु विभक्ताः सन्ति। वाल्मीकीयरामायणं विभिन्नेषु काण्डेषु, सर्गेषु श्लोकेषु च, महाभारतं विभिन्नेषु पर्वसु, अध्यायेषु श्लोकेषु च, पुराणानि स्कन्धेषु/अंशेषु, अध्यायेषु श्लोकेषु च विभक्तानि सन्ति। व्याकरण-न्याय-पूर्वोत्तरमीमांसादिसूत्राणि विभिन्नेष्वध्यापेषु पादेषु च विभक्तानि सन्ति। तत्राध्यायसंख्या, पादसंख्या, सूत्रसंख्या चातीवमहत्त्वं बिभ्रति। काव्यग्रन्थेष्वपि परिच्छेद-सर्ग-श्लोकसंख्यादीनां महत्त्वं नितरां भवति। उक्तेषु सर्वेषु ग्रन्थेषु संख्याङ्कनं विधायैव विषयवस्तूनां व्यवस्थापनं विहितं दृश्यते। इत्थञ्च संस्कृतवाङ्मये संख्याङ्कनस्य प्राचीनकालत एवाक्षुण्णा परम्परास्ति, पृथक् महत्त्वञ्चास्ति। अत एव संस्कृतवाङ्मयानुसन्धानप्रबन्धादिगतानां विषयाणां सुव्यवस्थिततायै, यथाक्रमत्वज्ञानाय, उपशीर्षकैरुपोपशीर्षकाणां, तैश्च प्रशीर्षकाणां सम्बन्धज्ञानाय च शोधप्रबन्धगतेषु, शोधपत्रगतेषु, शोधलेखगतेषु चोपशीर्षकादिषु संख्याङ्कनं कर्तव्यमेवेति दृश्यते। वस्तुतः शोधप्रबन्धेषु, शोधलेखेषु, पुस्तकेषु च

विवेचनविश्लेषणविषयीभूतानां सामग्रीणां व्यवस्थिततरूपेण प्रस्तुत्यै कतममुपोपशीर्षकं प्रशीर्षकं वा कतमोपशीर्षकान्तर्गतत्वेनोस्थापितमस्ति कश्च विषयः कतमोपशीर्षकान्तर्गतत्वेनोस्थापितोऽस्तीति स्पष्टतायै उपशीर्षकेषूपोपशीर्षकेषु चानिवार्यरूपेण सङ्ख्याङ्कनं कर्तव्यमेव भवति। अनुसन्धानप्रतिवेदनेन खलु सुबोध्येन व्यवस्थितेन च भाव्यम् । तदर्थञ्चाङ्काङ्कनमनिवार्यं भवति । संख्याङ्कितेषु चोपशीर्षकेषु एपिएशैलीनिर्दिष्टरीत्या तेषां केन्द्रीकरणं नावश्यकम्, न शोभते च केन्द्रे सङ्ख्याङ्कनम् । अत एवोपशीर्षकाणि वामतः स्थापनीयानि भवन्ति । एतदतिरिक्तम् उपोपशीर्षकादीनां स्थापनरीतिः एपिएशैलीनिर्देशानुसारेणैव भवेत्। सङ्ख्याङ्कनक्रमे च चतसृणामेव संख्यानां प्रयोगः कर्तुं शक्यते, न तदधिकानाम् । यथा २.१.१.१ इति । उक्तसंख्यायुतप्रशीर्षकान्तर्गतमन्यदपि गौणोपशीर्षकमागच्छेच्चेत् संख्याङ्कनं त्यक्त्वा सकोष्ठकं अक्षराङ्कनं कर्तव्यम्। तच्च (अ), (आ), (इ), (ई), (क), (ख ), (ग), (घ) इत्यादिक्रमेण कर्तुं शक्यते।

**निष्कर्षः**

अनुसन्धानोपलब्धिं शोधप्रबन्धरूपेण प्रस्तोतुं तदभिलेखनशैलीविषयकं ज्ञानमावश्यकं भवति । अधुना एपिए-एमएलए-सिकागो इत्यादयो विविधाः शैल्यः प्रचलिताः सन्ति, किन्तु संस्कृतवाङ्मयस्य मौलिकवैशिष्ट्यकारणात् ताः तत्सम्बद्धानुसन्धानप्रबन्धसन्दर्भेऽपर्याप्ताः सन्ति । अतः संस्कृतवाङ्मयसम्बद्धानुसन्धानक्षेत्रे मौलिकशैलीपुस्तिकाऽऽवश्यक्यस्ति । शोधविधिपद्धतिसम्बन्धेऽधुनापर्यन्तं प्रकाशितानि पुस्तकान्यप्यपर्याप्तानि । अत एव व्याकरणादिसंस्कृतवाङ्मय-सम्बद्धशोधप्रबन्धसम्पादनशैली का ? इति सामान्यां शोधसमस्यां, व्याकरणादिसंस्कृत-वाङ्मयसम्बद्धशोधस्वरूपं कीदृशं भवति ? उद्धरणप्रयोगः कथं कर्तव्यः ? सन्दर्भटिप्पणी कथं कर्तव्या ? सन्दर्भग्रन्थसूची कथं निर्मातव्या ? उपशीर्षकादिषु संख्याङ्कनं कर्तव्यं न वा ? इत्यादिविशिष्टीकृतसमस्याश्च केन्द्रीकृत्य तासां समाधानान्वेषणायात्रानुसन्धानात्मकलेखे संस्कृतवाङ्मयान्तर्गतानां विविधविषयाणां मौलिकग्रन्थेभ्यः शोधप्रबन्धेभ्यः शोधविधिपद्धतिसम्बद्धग्रन्थेभ्यः शोधलेखेभ्यः, एपिए-एमएलए-सिकागोशैलीपुस्तिकादिभ्यश्च स्थालीपुलाक-न्यायेन तथ्यरूपा आवश्यकसामग्रीः सङ्कलय्य तासां वर्णनं, विश्लेषणञ्च कृतम्। अनेनाध्ययनेन प्राप्तो निष्कर्षश्चात्र प्रस्तूयते–

संस्कृतशोधप्रबन्धस्वरूपस्यैकरूपतायै निश्चितमानदण्डस्य निदर्शनस्य च निर्धारणं कर्तव्यम् । अत्र लेखे तस्य दिग्दर्शनमेव कृतम् । शोधकर्तॄणां कृते शोधप्रबन्धसम्पादनशैलीज्ञानमत्यावश्यकं भवति । तत्रापि संस्कृतशोधप्रबन्धसम्पादनशैलीसन्दर्भे विशेषत उद्धरणप्रयोगविषये, सन्दर्भ-टिप्पणी/स्रोतःसङ्केतविषये, सन्दर्भग्रन्थसूचीविषये, उपशीर्षकादीनां संख्याङ्कनविषये च समापतिताः संशयात्मिकाः समस्याः समाधातुं प्रयत्नः कृतः । उद्धरणप्रयोगसन्दर्भे संस्कृतभाषायाः समस्तशब्दबहुलत्वेन शब्दगणनाधारेण उद्धरणानां लघुदीर्घाकारविभाजनं व्यावहारिकं न भवतीति पंक्तित्रयाकारवदुद्धरणं लघु, तदधिकाकारवदुद्धरणं दीर्घमित्यवधेयम् । लघूद्धरणं यथाप्रसङ्गमनुच्छेदमध्य एवोपन्यस्यते, दीर्घोद्धरणञ्च भिन्नानुच्छेदरूपेणैवोल्लेख्यमिति व्यवस्था गद्योद्धरणसन्दर्भ एव । श्लोकोद्धरणसन्दर्भे तु पंक्तिद्वयात्मकैकः श्लोकोऽपि दीर्घोद्धरणवद् भिन्नानुच्छेद एव केन्द्रीकृत्य प्रगाढीकृत्य च स्थापनीयः । गर्भटिप्पणीसन्दर्भे लेखकप्रधानानां गद्यात्मकानामाधुनिकस्वरूपाणां ग्रन्थानां स्रोतःसन्दर्भप्रदर्शनाय एपिएशैल्यनुरूपा गर्भटिप्पणी प्रयोक्तुं शक्यते

। अपौरुषेयाणां/ गौणीभूतलेखककानां, श्लोकसूत्रात्मकानां प्राचीनानां ग्रन्थानां कृते त्वाधुनिकप्रणाल्या गर्भटिप्पणी कर्तुं न शक्यते, न चोपयुज्यते । तेषां कृते प्रयुज्यमाना गर्भटिप्पणी तु काचिद् भिन्ना विशिष्टा च भवति, याऽत्र लेखे सोदाहरणं वर्णिता । सन्दर्भग्रन्थसूचीनिर्माणसन्दर्भे च वेदोपनिषदादीनामपौरुषेयाणां ग्रन्थानां लेखकाभावात् सन्दर्भग्रन्थसूचीप्रविष्टिक्रमे सर्वप्रथमं लेखकनाम एव दातव्यमिति वक्तुं न शक्यते, अतस्तद्विषये एपिएशैलीपुस्तिकाप्रदर्शितरीत्या लेखकस्थाने ग्रन्थस्यैव नाम स्थापनीयम् । पुराणानामपि स्वनाम्नैव प्रसिद्धत्वात् तत्र लेखकनामोल्लेखनस्यानिवार्यता न भवति । अत एव वेदोपनिषत्पुराणीनां सन्दर्भग्रन्थसूचीप्रविष्टिक्रमे **ग्रन्थनाम, लेखकनाम अथवा सम्पादक/टीकाकार/व्याख्याकारनाम (अस्ति चेदेव)**, प्रकाशनस्थानम्, प्रकाशकनाम, प्रकाशनवर्षश्चेति चत्वारि पञ्च वा प्रमुखतत्त्वानि क्रमशः समावेश्यानि । लेखक/सम्पादकप्रधानानां ग्रन्थानां कृते लेखक/सम्पादकनाम, ग्रन्थशीर्षकम्, प्रकाशनस्थानम्, प्रकाशकनाम, प्रकाशनवर्षश्चेति पञ्च प्रमुखतत्त्वानि **क्रमशः समावेश्यानि । शोधप्रबन्धानां कृते शोधकर्तुरन्त्यनाम, तत्प्रथमनाम, तिर्यग्वर्णेषु शोधप्रबन्धशीर्षकम्, कोष्ठके शोधप्रबन्धप्रकारः, विश्वविद्यालयादिसंस्थानाम, प्रस्तुति/प्रकाशन-वर्षश्चेति क्रमोऽवलम्बनीयः । अस्ति चेत् प्रकाशक/अन्तर्जालसङ्ग्राहक-नाम, लिङ्कपदवाच्यमणुस्रोतश्चेति द्वयमपि देयम् । शोधपत्रिकाणां कृते लेखकान्त्यनाम, तत्प्रथमनाम, युगलोद्धरणचिह्ने शोधलेखशीर्षकम्, तिर्यग्वर्णेषु शोधपत्रिकानाम, अंकसंख्या** (Volume), **कोष्ठके सम्बद्धलेखव्याप्तपृष्ठसंख्याः, प्रकाशनवर्षश्चेति क्रमोऽवलम्बनीयः । अन्त्ये सर्वत्र पूर्णविरामः** प्रदातव्यः । गर्भटिप्पणी यन्नामतः प्रारब्धास्ति, सन्दर्भग्रन्थसूच्यपि तन्नामत एव प्रारब्धव्येति ज्ञेयम् । विवेचनविश्लेषणविषयीभूतानां सामग्रीणां व्यवस्थितरूपेण प्रस्तुत्यै, शोधप्रबन्धादेः सुबोध्यत्वाय च तद्गतोपशीर्षकादिषु सङ्ख्याचतुष्टयं यावत् सङ्ख्याङ्कनं कर्तव्यमेव । उक्तसंख्यायुतप्रशीर्षकान्तर्गतमन्यदपि गौणोपशीर्षकेषु सत्सु तत्राक्षराङ्कनं कर्तव्यम् ।

इत्थञ्च- आधुनिकविषयेभ्यः पृथग्वैशिष्ट्ययुतस्य संस्कृतवाङ्मयस्य सन्दर्भे एपिए-एमएलए-सिकागो-प्रभृतयः शैल्योऽपर्याप्ता भवन्तीति संस्कृतवाङ्मयसम्बद्धानुसन्धानक्षेत्रेऽपि तासामेव शैलीनां यथावदनुकरणं नोपयुक्तम् । अतः संस्कृतशोधक्षेत्रे मौलिकशैलीविकासः कर्तव्य इति विचिन्त्यात्र **संस्कृतवाङ्मयसम्बद्ध-शोधप्रबन्धाद्यभिलेखनशैलीविषये विशेषत उद्धरणप्रयोग-सन्दर्भटिप्पणी-सन्दर्भग्रन्थसूची-संख्याङ्कनानां विषये संक्षिप्तविवेचनं विहितम्** । संस्कृतशोधशैल्याः पूर्णविवरणाय तु संस्कृतशोधशैलीग्रन्थ एव निर्मातव्य इति निष्कृष्यते ।

## सन्दर्भसूची


आचार्यः, हरिप्रसादः, गौतमः, स्थानेश्वरश्च (२०६०). *अनुसन्धानप्रकाशः* (द्वितीयावृत्तिः). महेन्द्रसंस्कृतविश्वविद्यालयः ।

घोडासैनी, खगेन्द्र (२०७९). एपिए सातौँ संस्करणका प्रावधानहरू. *हैमप्रभा* २१ (४२–५९) । https://doi.org/10.3126/haimaprabha.v21i01.44839 .

चौलागाईँ, प्रेमप्रसाद (२०८० कार्तिक १). 'अनुसन्धान पद्धति : सिद्धान्त र प्रयोग'ले कोरेको शोधको सैद्धान्तिक र प्रायोगिक मार्गचित्र. *साहित्यपोस्ट* (Last Updated : 25/12/2025, 1:55 PM) । https://sahityapost.com/top-news/126055/

तिवारी, प्रकाशः (२०८१). *अनुसन्धानपद्धतिः*. सङ्गीता भण्डारी।

त्रिपाठी, भागीरथीप्रसादः (ई. १९३९). *अनुसन्धानपद्धतिः*. वाराणसेयसंस्कृतविश्वविद्यालयः।

त्रिपाठी, विजयप्रसादः (२०४७). *समासवृत्तिविमर्शः*. सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः।

दहाल, विष्णुप्रसाद, चालिसे, नारायण, पौडेल, सुधन, पौडेल, नारद, रेग्मी, नगेन्द्रराज, आचार्य, कल्पना (२०७३). शोध प्रबन्ध सङ्गठनको प्रारूप (परिशिष्ट ख) *अनुसन्धान प्रकाश* ४. नेपाल संस्कृत विश्वविद्यालय अनुसन्धान केन्द्र, १५२-१५५।

पाण्डेय, ताराकान्त (२०७३). विद्यावारिधि शोध प्रबन्धको सङ्गठन र ढाँचाको प्रायोगिकी. *अनुसन्धान-प्रकाश* ४. नेपाल संस्कृत विश्वविद्यालय अनुसन्धान केन्द्र।

पोखरेल, केशवराज (ई. २०२३). एपिए शैलीको परिचय र प्रयोग. *Solukhumbu Multiiple Campus Research Journal* 7, (२७-४५) I https://doi.org/10.3126/smcrj.v5i1.64943

पोखरेल, माधवप्रसाद (२०७३). संस्कृत वाङ्मयको शोधविधि. *अनुसन्धान प्रकाश* ४. नेपाल संस्कृत विश्वविद्यालय अनुसन्धान केन्द्र, १२१-१२९।

पौडेलः, लीलानाथः (२०६४). *व्याकरणदृष्ट्या हरिकेलिमहाकाव्यस्य समीक्षणम्* [अप्रकाशितो विद्यावारिधिशोधप्रबन्धः]. नेपालसंस्कृतविश्वविद्यालयः।

पौडेलः, हरिलालः (२०८०). व्याकरण-विशिष्टाद्वैतदर्शनाभिमतब्रह्मविमर्शः. *अन्वेषणा* १ (११३-१२६)।

पौडेलः, हरिलालः (२०८२). संस्कृतवाङ्मयस्थसमासप्रयोगस्यैतिहासिकं सर्वेक्षणम्. *कालिकाप्रभा* ३ (१४६-१६४)। https://doi.org/10.3126/kp.v3i3.84498

रिछारिया, गोपालशरणः (ई. २०२२). *शब्दार्थतर्कामृतग्रन्थस्य दार्शनिकमनुशीलनम्* [विद्यावारिधिशोधप्रबन्धः, काशीहिन्दूविश्वविद्यालयः]। http://hdl.handle.net/10603/454524

रेग्मी, सत्यराजः (ई. २०१९). *पाणिनीयव्याकरणव्युत्पत्तिदृशा शुक्लयजुर्वेदीयरुद्राष्टाध्यायीमन्त्राणां परिशीलनम्* [विद्यावारिधिशोधप्रबन्धः, राष्ट्रियसंस्कृतसंस्थानम्, क. जे. सोमैयासंस्कृतविद्यापीठम्]। http://hdl.handle.net/10603/389260

श्रेष्ठ, दयाराम (२०७३). शोधपत्रको अभिलेखन पद्धति. *अनुसन्धान-प्रकाश* ४. नेपाल संस्कृत विश्वविद्यालय अनुसन्धान केन्द्र।

श्रेष्ठ, दयाराम (२०७९). *साहित्यको अनुसन्धान व्यवस्थापन (अनुसन्धान दर्शन)* (द्वि . संस्क.). शिखा बुक्स ।

American Psychological Association (AD 2020). *Publication Manual of the American Psychological Association* (Seventh Edition). https://dokumen.pub/publication-manual-of-the-american-psychological-association-7nbsped-1433832178-9781433832178.html. PDF Download.

google (AD 2025). Theses and dissertations - *Chicago Referencing Guide* - Library Guides at AUT University (Last Updated: Oct 24, 1:56 PM ). https://share.google/W5ublVa7sfWiH8v5i

The Modern Language Association of America (AD 2024). *MLA Handbook* (Ninth Editon). The Modern Language Association of America . https://dokumen.pub/mla-handbook-9nbsped-2020039581-2020039582-9781603293518-9781603295611-9781603295628-9781603293525.html . PDF Download.

The University of Chicago (AD 2024). *THE CHICAGO MANUAL OF STYLE* (Eighteenth Edition). The University of Chicago Press. dokumen.pub/the-chicago-manual-of-style-18th-edition-18nbsped-0226817970-9780226817972.html . PDF Download.

Zaboli, Aydin (AD 2025). *AI-Driven Anomaly Detection in Modern Power Systems* [PHD dissertation, Rackham Graduate School, University of Michigan]. https://dx.doi.org/10.7302/27307 https://deepblue.lib.umich.edu/bitstreams/aa2e0db9-4825-49f3-b14f-db271c05376f/download.